# Advaita Makaranda

# અદ્વૈતમકરન્દઃ

## Document Information

Text title : advaitamakaranda

File name : advaitamakaranda.itx

Category : major_works

Location : doc_z_misc_major_works

Author : lakSmIdharakavi

Transliterated by : Br. Pranipata Chaitanya pranipatachaitanya [ at ] yahoo.co.in

Proofread by : Sunder Hattangadi

Latest update : January 1, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Advaita Makaranda

# અદ્વૈતમકરન્દઃ

શ્રીલક્ષ્મીધરકવિવિરચિતઃ
અદ્વૈતમકરન્દઃ
સ્વયંપ્રકાશકૃતટીકાસહિતઃ
એવમ્
રસાભિવ્યઞ્જિકાવ્યાખ્યાસહિતઃ

॥ અથ અદ્વૈતમકરન્દઃ ॥

કટાક્ષકિરણાચાન્તનમન્મોહાબ્ધયે નમઃ ।
અનન્તાનન્દકૃષ્ણાય જગન્મઙ્ગલમૂર્તયે ॥ ૧॥

અહમસ્મિ સદા ભામિ કદાચિન્નાહમપ્રિયઃ ।
બ્રહ્મૈવાઽહમતઃ સિદ્ધં સચ્ચિદાનન્દલક્ષણમ્ ॥ ૨॥

મય્યેવોદેતિ ચિદ્વ્યોમ્નિ જગદ્ગન્ધર્વપત્તનમ્ ।
અતોઽહં ન કથં બ્રહ્મ સર્વજ્ઞં સર્વકારણમ્ ॥ ૩॥

ન સ્વતઃ પ્રત્યભિજ્ઞાનાન્નિરંશત્વાન્ન ચાન્યતઃ ।
ન ચાશ્રયવિનાશાન્મે વિનાશઃ સ્યાદનાશ્રયાત્ ॥ ૪॥

ન શોષપ્લોષવિક્લેદચ્છેદાશ્ચિન્નભસો મમ ।
સત્યૈરપ્યનિલાગ્ન્યમ્ભઃ શસ્ત્રૈઃ કિમુત કલ્પિતૈઃ ॥ ૫॥

આભારૂપસ્ય વિશ્વસ્ય ભાનં ભાસંનિધેર્વિના ।
કદાચિન્નાવકલ્પેત ભા ચાહં તેન સર્વગઃ ॥ ૬॥

ન હિ ભાનાદૃતે સત્ત્વં નર્તે ભાનં ચિતોઽચિતઃ ।
ચિત્સમ્ભેદોઽપિ નાધ્યાસાદૃતે તેનાહમદ્વયઃ ॥ ૭॥

ન દેહો નેન્દ્રિયં ચાહં ન પ્રાણો ન મનો ન ધીઃ ।
મમતાપરિરબ્ધત્વાદાક્રીડત્વાદિદં ધિયઃ ॥ ૮॥

સાક્ષી સર્વાન્વિતઃ પ્રેયાનહં નાહં કદાચન ।
પરિણામપરિચ્છેદપરિતાપૈરુપપ્લવાત્ ॥ ૯॥

સુપ્તેઽહમિ ન દૃશ્યન્તે દુઃખદોષપ્રવૃત્તયઃ ।
અતસ્તસ્યૈવ સંસારો ન મે સંસર્તૃસાક્ષિણઃ ॥ ૧૦॥

સુપ્તઃ સુપ્તિં ન જનાતિ નાઽસુપ્તે સ્વપ્નજાગરૌ ।
જાગ્રત્સ્વપ્નસુષુપ્તીનાં સાક્ષ્યતોઽહમતદ્દૃશઃ ॥ ૧૧॥

વિજ્ઞાનવિરતિઃ સુપ્તિસ્તજ્જન્મ સ્વપ્નજાગરૌ ।
તત્સાક્ષિણઃ કથં મે સ્યુર્નિત્યજ્ઞાનસ્ય તે ત્રયઃ ॥ ૧૨॥

ષડ્વિકારવતાં વેત્તા નિર્વિકારોઽહમન્યથા ।
તદ્વિકારાનુસન્ધાનં સર્વથા નાવકલ્પતે ॥ ૧૩॥

તેન તેન હિ રૂપેણ જાયતે લીયતે મુહુઃ ।
વિકારિ વસ્તુ તસ્યૈષામનુસન્ધાતૃતા કુતઃ ॥ ૧૪॥

ન ચ સ્વજન્મ નાશં વા દ્રષ્ટુમર્હતિ કશ્ચન ।
તૌ હિ પ્રાગુત્તરાભાવચરમપ્રથમક્ષણૌ ॥ ૧૫॥

ન પ્રકાશેઽહમિત્યુક્તિર્યત્પ્રકાશૈકબન્ધના ।
સ્વપ્રકાશં તમાત્માનમપ્રકાશઃ કથં સ્પૃશેત્ ॥ ૧૬॥

તથાપ્યાભાતિ કોઽપ્યેષ વિચારાભાવજીવનઃ ।
અવશ્યાયશ્ચિદાકાશે વિચારાર્કોદયાવધિઃ ॥ ૧૭॥

આત્માજ્ઞાનમહાનિદ્રાજૃમ્ભિતેઽસ્મિન્ જગન્મયે ।
દીર્ઘસ્વપ્ને સ્ફુરન્ત્યેતે સ્વર્ગમોક્ષાદિવિભ્રમાઃ ॥ ૧૮॥

જડાજડવિભાગોઽયમજડે મયિ કલ્પિતઃ ।
ભિત્તિભાગે સમે ચિત્રચરાચરવિભાગવત્ ॥ ૧૯॥

ચેત્યોપરાગરૂપા મે સાક્ષિતાપિ ન તાત્ત્વિકી ।
ઉપલક્ષણમેવેયં નિસ્તરઙ્ગચિદમ્બુધેઃ ॥ ૨૦॥

અમૃતાબ્ધેર્ન મે જીર્ણિર્મૃષા ડિણ્ડીરજન્મભિઃ ।
સ્ફટિકાદ્રેર્મે રાગઃ સ્વાપ્નસંધ્યાભ્રવિભ્રમૈઃ ॥ ૨૧॥

સ્વરૂપમેવ મે સત્ત્વં ન તુ ધર્મો નભસ્ત્વવત્ ।
મદન્યસ્ય સતોઽભાવાન્ન હિ સા જાતિરિષ્યતે ॥ ૨૨॥

સ્વરૂપમેવ મે જ્ઞાનં ન ગુણઃ સ ગુણો યદિ ।
અનાત્મત્વમસત્ત્વં વા જ્ઞેયાજ્ઞેયત્વયોઃ પતેત્ ॥ ૨૩॥

અહમેવ સુખં નાન્યદન્યચ્ચેન્નૈવ તત્ સુખમ્ ।
અમદર્થં ન હિ પ્રેયો મદર્થં ન સ્વતઃ પ્રિયમ્ ॥ ૨૪॥

ન હિ નાનાસ્વરૂપં સ્યાદેકં વસ્તુ કદાચન ।
તસ્માદખણ્ડ એવાસ્મિ વિજહજ્જાગતીં ભિદામ્ ॥ ૨૫॥

પરોક્ષતાપરિચ્છેદશાબલ્યાપોહનિર્મલમ્ ।
તદસીતિ ગિરા લક્ષ્યમહમેકરસં મહઃ ॥ ૨૬॥

ઉપશાન્તજગજ્જીવશિષ્યાચાર્યેશ્વરભ્રમમ્ ।
સ્વતઃ સિદ્ધમનાદ્યન્તં પરિપૂર્ણમહં મહઃ ॥ ૨૭॥

લક્ષ્મીધરકવેઃ સૂક્તિશરદમ્ભોજસમ્ભૃતઃ ।
અદ્વૈતમકરન્દોઽયં વિદ્વદ્ભૃઙ્ગૈર્નિપીયતામ્ ॥ ૨૮॥

---

શ્રીલક્ષ્મીધરકવિવિરચિતઃ

અદ્વૈતમકરન્દઃ

સહિતં સ્વયંપ્રકાશકૃતટીકાસહિતઃ

એવમ્

રસાભિવ્યઞ્જિકાવ્યાખ્યાસહિતઃ

નિત્યં નિરન્તરાનન્દં ચિદ્ઘનં બ્રહ્મ નિર્ભયમ્ ।
શ્રુત્યા તર્કાનુભૂતિભ્યામહમસ્મ્યદ્વયં સદા ॥ ૧॥

અમ્બાગૃહીતવામાર્ધં વન્દે ચન્દ્રકલાધરમ્ ।
લાવણ્યમધુરાકારં કારુણ્યરસવારિધિમ્ ॥ ૨॥

કૈવલ્યાનન્દયોગીન્દ્રપાદપઙ્કજરજોરવિઃ ।
રાજતે મે હૃદાકાશે મોહધ્વાન્તનિવર્તકઃ ॥ ૩॥

શુદ્ધાનન્દપદામ્ભોજદ્વન્દ્વં સેવે યદુદ્ભવમ્ ।
નિર્વાણરસમાસ્વાદ્ય હૃષ્ટાઃ શિષ્યાલિપઙ્ક્તયઃ ॥ ૪॥

સચ્ચિદાનન્દયોગીન્દ્રા જયન્તિ ભુવિ કેચન ।

યત્કૃપાલવતસ્તીર્ણો મયા સંસારવારિધિઃ ॥ ૫॥

ઇહ ખલુ લક્ષ્મીધરો નામ કશ્ચિત્ કવીન્દ્રો નિરન્તરનિત્યાદ્યનુષ્ઠાનશુદ્ધસ્વાન્તતયા સઞ્જાતવિવેકવૈરાગ્યશમાદિમુમુક્ષાવત આત્મવિવિદિષયા સંત્યક્તલોકવેદધર્માન્ ગુરુવરચરણોપસર્પણપુરઃસરં સમ્યક્શ્રુતવેદાન્તતત્ત્વેઽપ્યસંભાવનયા પ્રતિબન્ધજ્ઞાનતયાઽપરિતુષ્યતઃ કાંશ્ચિત્ પુરુષધૌરેયાનુપલભ્ય સઞ્જાતકરુણસ્તેષાં કરતલબિલ્વફલવત્ સ્ફુટં વેદાન્તપ્રતિપાદ્યં બ્રહ્મ સચ્ચિદાનન્દલક્ષણં સર્વજ્ઞં સર્વોપાદાનં નિત્યં સર્વગમદ્વયં દેહેન્દ્રિયપ્રાણમનોબુદ્ધ્યહઙ્કારસાક્ષિ પ્રત્યગભિન્નતયા તર્કૈઃ સમ્ભાવયિતું કિઞ્ચિત્ પ્રકરણમદ્વૈતમકરન્દાખ્યમારભમાણશ્ચિકીર્ષિતસ્યાવિઘ્નેન પરિસમાપ્તયે સ્વેષ્ટદેવતાપ્રણામરૂપં મઙ્ગલં સ્વયમનુષ્ઠાય શિષ્યશિક્ષાયૈ ગ્રન્થતો નિબધ્નાતિ —

કટાક્ષકિરણાચાન્તનમન્મોહાબ્ધયે નમઃ ।
અનન્તાનન્દકૃષ્ણાય જગન્મઙ્ગલમૂર્તયે ॥ ૧॥

કટાક્ષો ભક્તેષુ તિર્યક્પાતિતા કૃપાદૃષ્ટિઃ, તસ્યાઃ કિરણેન પ્રભયા, આચાન્તઃ શોષિતો નમતાં નમસ્કર્તૄણાં મોહોઽજ્ઞાનં સ એવાબ્ધિઃ સમુદ્રો યેન સઃ, તથા તસ્મૈ, શ્રીગુરુપરમેશ્વરપ્રસાદરહિતાનાં દુસ્તરત્વાદ્ ભ્રાન્તિપરમ્પરાતરઙ્ગયુક્તત્વાદ્રાગાદિમહાગ્રાહાદિયોગાચ્ચ યુક્તમજ્ઞાનસ્ય સમુદ્રત્વમ્। અનન્તાનન્દકૃષ્ણાય અનન્તો દેશકાલવસ્તુપરિચ્છેદશૂન્ય આનન્દઃ સ્વરૂપં યસ્ય સઃ, અનન્તાનન્દઃ, સ ચાસૌ કૃષ્ણશ્ચ, અનન્તાનન્દકૃષ્ણઃ, વસુદેવકુમારઃ, તસ્મૈ, જગન્મઙ્ગલમૂર્તયે જગતાં લોકાનાં  મઙ્ગલભૂતા સુખાભિવૃદ્ધિકરી મૂર્તિર્વિગ્રહો યસ્ય સ જગન્મઙ્ગલમૂર્તિસ્તસ્મૈ, નમોઽસ્તુ । જગન્મઙ્ગલમૂર્તય ઇત્યનેન સ્મૃતિમાત્રેણ તસ્યૈહિકામુષ્મિકપુરુષાર્થપરિપન્થિવિઘ્નનિરાસસામર્થ્યમુક્તમ્, મઙ્ગલસ્ય તાદૃશત્વાત્ ॥ ૧॥

એવમનુષ્ઠિતસ્વેષ્ટદેવતાનમસ્કારલક્ષણમઙ્ગલનિબર્હિતસકલાન્તરાયઃ પ્રથમં તત્ત્વમસ્યાદિવાક્યૈસ્તાત્પર્યયુક્તૈર્બોધિતં પ્રત્યગાત્મનો

બ્રહ્મત્વં યુક્ત્યા સમ્ભાવયન્નાહ –

અહમસ્મિ સદા ભામિ કદાચિન્નાહમપ્રિયઃ ।
બ્રહ્મૈવાऽહમતઃ સિદ્ધં સચ્ચિદાનન્દલક્ષણમ્ ॥ ૨॥

અહમસ્મીતિ । અહમહઙ્કારાદિસાક્ષ્યસ્મિ, સદ્રૂપો ભવામિ, આત્મન્યધ્યસ્તાહઙ્કારાદેઃ સત્તાપ્રદત્વાત્, સદાવસ્થાત્રયેऽપિ ભામિ, જાગ્રતિ દેહેન્દ્રિયાદિસાક્ષિતયા, સ્વપ્નેऽન્તઃકરણવાસનાપ્રપઞ્ચસાક્ષિતયા, સુષુપ્તાવજ્ઞાનસાક્ષિતયા ચ પ્રકાશે, કદાચિત્, કદાચિદપિ, દુઃખાદ્યનુભવકાલેऽપિ, અહં નાપ્રિયો ભવામિ, નાનિષ્ટો ભવામિ; કિન્તુ સદા પ્રિય એવ ભવામિ, દુઃખાદૌ દ્વેષસ્યાત્મસ્નેહનિમિત્તત્વાચ્છત્રુદુઃખાદૌ દ્વેષસ્યાદર્શનાત્, તથા ચ પરમપ્રીતિવિષયત્વાદાનન્દરૂપઃ, યસ્માત્ કાલત્રયેऽપ્યબાધ્યમાનત્વાત્ સદ્રૂપઃ, પ્રકાશમાનત્વાચ્ચિદ્રૂપઃ, પરમપ્રીતિવિષયત્વાદાનન્દરૂપશ્ચ, તસ્માદહં સચ્ચિદાનન્દલક્ષણં સચ્ચિદાનન્દરૂપં બ્રહ્મેતિ સિદ્ધમ્ । અત્રેદમનુમાનં વિવક્ષિતમ્ । પ્રત્યગાત્મા બ્રહ્મણો ન ભિદ્યતે, સચ્ચિદાનન્દરૂપત્વાત્, બ્રહ્મવદિતિ, ન ચ હેતુરસિદ્ધઃ, અહમસ્મીત્યાદિના તસ્ય સાધિતત્વાત્ ।

નન્વનુમાનસ્ય નાऽહમીશ્વર ઇતિ પ્રત્યક્ષવિરોધ ઇતિ ચેત્, ન, તાવદાત્મનો બ્રહ્મત્વે બાહ્યપ્રત્યક્ષવિરોધઃ, આત્મનિ રૂપાદ્યભાવેન બાહ્યસ્ય તત્રાऽપ્રવૃત્તેઃ, નાऽપિ માનસપ્રત્યક્ષવિરોધઃ, મનસો મનઃસાક્ષિણ્યાત્મનિ પ્રવૃત્તેરસમ્ભવાત્ ॥

નનુ જીવેશ્વરૌ ભિન્નૌ, કિઞ્ચિજ્જ્ઞત્વસર્વજ્ઞત્વાદિવિરુદ્ધધર્માધારત્વાદ્, દહનતુહિનવત્, ઇત્યાદ્યનુમાનવિરોધ ઇતિ ચેત્, ન, વિરુદ્ધધર્મવતોર્બિમ્બપ્રતિબિમ્બયોરુચ્ચમન્દશબ્દાધાર આકાશે ચ વ્યભિચારાત્ ।

નનુ "દ્વા સુપર્ણા" ઇત્યાદિશ્રુતિવિરોધ ઇતિ ચેત્, ન, તસ્યા અતત્પરત્વેન તત્ત્વમસ્યાદિશ્રુત્યા બાધ્યમાનત્વાત્ ।

તસ્માન્નાહમીશ્વર ઇતિ બુદ્ધિર્દેહાદ્યુપાધિનિમિત્તા ભ્રાન્તિઃ । ન તુ જીવસ્વરૂપવિષયા । તદુક્તમ્ –

"ત્વયિ મયિ ચ ગણ્યમાને મશકાન્મશકોऽહમેવ દેહદૃશા ।

વિશ્વાધિકેશ તે મે સદ્બોધાનન્દપૂર્ણતા તુલ્યા" ॥ ઇતિ ।

અતોઽહં બ્રહ્મૈવેતિ ભાવઃ ॥ ૨॥

નનુ "યઃ સર્વજ્ઞઃ સર્વવિ" દિત્યાદિશ્રુત્યા હિ બ્રહ્મ સર્વજ્ઞતયાવગમ્યતે,
યતો વેત્યાદિશ્રુત્યા ચ સર્વજગત્કારણતયા ચ, પ્રત્યગાત્મા તુ
સ્વશરીરાદિકમપિ સાકલ્યેન ન જાનાતિ, સ્વાતન્ત્ર્યેણ કિઞ્ચિત્ કર્તુમપિ
ન શક્નોતિ, તત્ કથમસ્ય સર્વજ્ઞેન સર્વકારણેન ચ બ્રહ્મણાભેદ
ઇત્યાશઙ્ક્ય પ્રત્યગાત્મનોઽપિ તદ્દ્વયમુપપાદયતિ —

મય્યેવોદેતિ ચિદ્વ્યોમ્નિ જગદ્ગન્ધર્વપત્તનમ્ ।
અતોઽહં ન કથં બ્રહ્મ સર્વજ્ઞં સર્વકારણમ્ ॥ ૩॥

મય્યેવેતિ । ચિદ્વ્યોમ્નિ ચિદાકાશે મયિ પ્રત્યગાત્મન્યેવ,
જગદ્ગન્ધર્વપત્તનં જગદેવ ગન્ધર્વપત્તનમ્,
ઐન્દ્રજાલિકવિક્ષુબ્ધમાયયા મરણાવસ્થાયાં ચ મેઘેષુ પ્રતીયમાનં
નગરં ગન્ધર્વપત્તનં નામ, તાદૃશમિદં જગદુદેતિ, ઉત્પદ્યત
ઇત્યર્થઃ । અયં ભાવઃ – મિથ્યાપદાર્થસ્ય હિ દ્રષ્ટૈવોપાદાનમ્,
યથા સ્વપ્નપ્રપઞ્ચસ્ય તત્સાક્ષી, તથા જાગ્રત્પ્રપઞ્ચસ્યાપિ સર્વસ્ય
દૃશ્યત્વેન મિથ્યાત્વાત્ તદ્દ્રષ્ટા પ્રત્યગાત્મૈવોપાદાનં વક્તવ્યમ્ ।
તદુક્તમ્ –

યથા સ્વપ્નપ્રપઞ્ચોઽયં મયિ માયાવિજૃમ્ભિતઃ ।
એવં જાગ્રત્પ્રપઞ્ચશ્ચ મયિ માયાવિજૃમ્ભિતઃ ॥ ઇતિ ।

એવં ચ પ્રત્યગાત્મનસ્તદ્દ્રષ્ટૃત્વલક્ષણં સર્વજ્ઞત્વં
તદધિષ્ઠાનત્વલક્ષણં સર્વકારણત્વં ચ સિધ્યતિ ।

નનુ બહુદૂરવ્યવહિતમેર્વાદીનામદૃશ્યમાનાનાં કથં પ્રત્યગાત્મા
દ્રષ્ટા, કથં વા તદુપાદાનમિતિ ચેત્, શૃણુ તર્હિ રહસ્યમ્,
એતાવન્તં કાલં મેર્વાદિકમહં નાજ્ઞાસિષમિતિ હ્યજ્ઞાનવિશેષણતયા
મેર્વાદિકં સ્મર્યતે, તચ્ચ સ્મરણં મેર્વાદ્યનુભવં વિનાનુપપદ્યમાનં
સન્મેર્વાદ્યનુભવં કલ્પયતિ, તત્ર ચેન્દ્રિયાદીનામપ્રવૃત્તેઃ
પ્રત્યગાત્મચૈતન્યેઽધ્યસ્તતયૈવ મેર્વાદ્યનુભવો વક્તવ્યઃ ।
અધ્યસ્તસ્ય ચાધિષ્ઠાનમેવોપાદાનં તદ્ભાનાદેવ ભાનં ચ ભવતિ,
તથા ચ પ્રત્યગાત્મા સ્વાધ્યસ્તમેર્વાદેરપ્યજ્ઞાતતયા સાક્ષી, તદુપાદાનં
ચ ભવતિ, તદુક્તં બ્રહ્મગીતાયામ્ –

“જ્ઞાતરૂપેણ ચાજ્ઞાતસ્વરૂપેણ ચ સાક્ષિણઃ ।
સર્વં ભાતિ તદાભાતિ તતસ્તદ્ વ્યાપિ સર્વદા” ॥ ઇતિ।

તથા ચ પ્રત્યગાત્મા સર્વજ્ઞઃ સર્વકારણં ચેતિ । યત
ઉક્તપ્રકારેણ સર્વકારણં ચાહમતઃ કથં તદ્રૂપં બ્રહ્મ ન ભવામિ,
ભવામ્યેવેત્યર્થઃ ॥ ૩॥

નનુ “નિત્યં વિભું સર્વગતં સુસૂક્ષ્મમ્” ઇત્યાદ્યુપનિષત્સુ નિત્યં બ્રહ્મ
શ્રૂયતે, આત્મા ચ મરણાદિધર્મકત્વાદનિત્ય એવાનુભૂયતે, તતશ્ચ ન
તયોરૈક્યમિત્યાશઙ્ક્ય કિમાત્મનો બૌદ્ધપક્ષ ઇવ સ્વત એવ નાશં
બ્રવીષિ, ઉત દણ્ડસંયોગાદ્ઘટસ્યેવાન્યસમ્બન્ધાદાત્મનો નાશં બ્રવીષિ,
અથવા પટનાશાત્ પટગતરૂપાદિવદાશ્રયનાશાન્નાશં બ્રવીષિ, ઇતિ
વિકલ્પ્યાદ્યં પ્રત્યાહ –

ન સ્વતઃ પ્રત્યભિજ્ઞાનાન્નિરંશત્વાન્ન ચાન્યતઃ ।
ન ચાશ્રયવિનાશાન્મે વિનાશઃ સ્યાદનાશ્રયાત્ ॥ ૪॥

ન સ્વત ઇતિ । મે પ્રત્યગાત્મનો મમ ન સ્વતો નાશો ભવતિ તત્ર હેતુઃ,
પ્રત્યભિજ્ઞાનાદાત્મનઃ પ્રત્યભિજ્ઞાયમાનત્વાત્ । પ્રત્યભિજ્ઞાનં
નામ પૂર્વમનુભૂતસ્ય કાલાન્તરે પ્રમાણેન તત્તોલ્લેખપૂર્વકં જ્ઞાનમ્ ।
આત્મા હિ યોઽહં બાલ્યે પિતરાવન્વભૂવં સ એવેદાનીં સ્થવિરે
પ્રણપ્તૄનનુભવામિ, યોઽહં સુપ્તઃ સ્વપ્નમદ્રાક્ષં સ એવેદાનીં
જાગર્મીતિ ચ બાલ્યાદ્યવસ્થાસુ જાગ્રદાદ્યવસ્થાસુ ચ પ્રત્યભિજ્ઞાયતે ।
તચ્ચ પ્રત્યભિજ્ઞાનમાત્મનો નિર્નિમિત્તનાશે નોપપદ્યતે । તથા
હિ, આત્મનો હિ સ્વતો નાશે પ્રતિક્ષણમન્યોઽન્ય આત્મેતિ વક્તવ્યમ્ ।
તત્ર કથં વાન્યોઽન્યેન સોઽહમિતિ પ્રત્યભિજ્ઞાયેત, આત્મા ચ
સોઽહમિત્યાત્માનં પ્રત્યભિજાનાતિ । તસ્માન્ન તસ્ય સ્વતો નાશ ઇત્યર્થઃ ।

ન દ્વિતીય ઇત્યાહ । નિરંશત્વાન્ન ચાન્યત
ઇતિ । નિરંશત્વાદંશરહિતત્વાન્નિરવયવત્વાદ્ અન્યતો
હેતુસંયોગાદપ્યાત્મનો ન નાશ ઇત્યર્થઃ । આત્મા હિ ચિદ્રૂપત્વાન્નિરવયવઃ ।
યદિ નિરવયવસ્યાત્મનઃ સાવયવત્વમુચ્યેત, તર્હિ વક્તવ્યમ્,
આત્માવયવાશ્ચેતના અચેતના વા ।

નાદ્યઃ, આત્માવયવાનાં હિ પ્રત્યેકં ચેતનત્વે વિરુદ્ધાભિપ્રાયતયા

શરીરમુન્મથ્યેત ।

ન દ્વિતીયઃ
અચેતનૈરવયવૈરારબ્ધસ્યાપ્યાત્મનોઽપ્યચેતનત્વપ્રસઙ્ગાત્,
ન હ્યચેતનૈસ્તન્તુભિરારબ્ધઃ પટશ્ચેતનો દૃશ્યતે, તતો
નિરવયવ એવાત્મા, ન નિરવયવે ચાત્મનિ હેતુસંયોગઃ સમ્ભવતિ,
સત્યૈકદેશવૃત્તિત્વાત્, અતોઽન્યતોઽપ્યાત્મનો ન નાશ ઇતિ ભાવઃ ।

નાપિ તૃતીય ઇત્યાહ । ન ચાશ્રયેત્યાદિના ।
આશ્રયવિનાશાદાધારવિનાશાદપિ મે મમ વિનાશો ન સ્યાત્,
કુતઃ? અનાશ્રયાત્, આશ્રયસ્યાધારસ્યાભાવાત્ । આત્મા હિ
ગુણક્રિયાજાત્યાદ્યન્યતમત્વાભાવાદનાશ્રયઃ, નિરવયવત્વાચ્ચ
નાપિ ઘટવદાશ્રયઃ । અત આશ્રયનાશાદપ્યાત્મનો ન
નાશઃ । આત્મનો મરણાદિપ્રતીતિસ્તુ દેહાદ્યુપાધિકૃતા ।
તદુક્તં સૂત્રકૃતા – "ચરાચરવ્યપાશ્રયસ્તુ સ્યાત્
તદ્વ્યપદેશો ભાક્તસ્તદ્ભાવભાવિત્વા" દિતિ । અસ્ય ચાર્થો
વિદ્યારણ્યગુરુભિરધિકરણરત્નમાલાયાં દર્શિતઃ ।

"જીવસ્ય જન્મમરણે વપુષો વાત્મનો હિ તે ।
જાતો મે પુત્ર ઇત્યુક્તેર્જાતકર્માદિભિસ્તથા" ॥

ઇતિ પૂર્વપક્ષે પ્રાપ્તે સિદ્ધાન્તમાહ –

"મુખ્યે તે વપુષો ભાક્તે જીવસ્યૈતે અપેક્ષ્ય હિ ।
જાતકર્મ ચ લોકોક્તિર્જીવાપેતેતિ શાસ્ત્રતઃ" ॥ ઇતિ ।

તતસ્ત્રિવિધનાશાભાવાન્નિત્ય એવાત્મેતિ તસ્ય બ્રહ્મણોઽભેદઃ સમ્યગ્
ઘટત ઇતિ ભાવઃ ॥ ૪॥

હેતુસંયોગાદાત્મનો ન નાશ ઇતિ દ્વિતીયં પક્ષં પ્રપઞ્ચયતિ –

ન શોષપ્લોષવિક્લેદચ્છેદાશ્ચિન્નભસો મમ ।
સત્યૈરપ્યનિલાગ્ન્યમ્ભઃ શસ્ત્રૈઃ કિમુત કલ્પિતૈઃ ॥ ૫॥

ન શોષેતિ । ચિન્નભસશ્ચિદાકાશસ્ય મમાત્મનોઽનિલેન વાયુના ન
શોષઃ શોષણં પત્રફલાદેરિવ ભવતિ, નાપ્યગ્નિના પ્લોષો દાહઃ
પટાદેરિવ ભવતિ, નાપ્યમ્ભસા જલેન શસ્યાદેરિવ વિક્લેદઃ ક્લેદનં
ભવતિ, નાપિ શસ્ત્રેણાયુધેનેક્ષુદણ્ડાદેરિવ ચ્છેદો દ્વૈધીભાવ

આત્મનો ભવતિ, આકાશસ્યેવાત્મનો નિરવયવત્વેન વાય્વાદિભિઃ સમ્બન્ધાભાવાદિત્યર્થઃ । વ્યાવહારિકસત્યસ્ય ભૂતાકાશસ્યૈવ હિ નિરવયવત્વેનાસઙ્ગત્વાદાકાશતુલ્યસત્યૈરપ્યનિલાદિભિઃ શોષાદયો ન ભવન્તિ, આત્મનિ માયાકલ્પિતત્વેન મિથ્યાભૂતૈર્વાય્વાદિભિર્વસ્તુતોઽદ્વિતીયસ્યાસઙ્ગસ્યાત્મનઃ શોષાદયો ન સમ્ભવન્તીતિ કિમુ વક્તવ્યમિત્યર્થઃ । તદુક્તં ભગવતા – “અચ્છેદ્યોઽય” મિત્યાદિના ॥ ૫॥

નનુ પ્રત્યગાત્મા પરિચ્છિન્ન એવાનુભૂયતે, અહમિહાસ્મીતિ પ્રતીતેઃ । બ્રહ્મ ચ સર્વગતમ્, “નિત્યં વિભુમ્” ઇત્યાદિશ્રુતેઃ । અતો નાયં બ્રહ્મેત્યાશઙ્ક્યાત્મનઃ સર્વગતત્વં યુક્ત્યા સમ્ભાવયન્નાહ –

આભારૂપસ્ય વિશ્વસ્ય ભાનં ભાસંનિધેર્વિના ।
કદાચિન્નાવકલ્પેત ભા ચાહં તેન સર્વગઃ ॥ ૬॥

આભારૂપસ્યેતિ । આભારૂપસ્યાચિદ્રૂપસ્ય જડસ્યેત્યર્થઃ, વિશ્વસ્ય જગતો ભાનં પ્રકાશો ભાસંનિધેર્વિના ભાસંનિધિં વિના, ચૈતન્યસમ્બન્ધં વિનેત્યર્થઃ, કદાચિત્ કદાચિદપિ નાવકલ્પેત, ન સમ્ભવેત્, ભાચૈતન્યરૂપશ્ચાહં પ્રત્યગાત્મા, તેન જડસર્વપ્રપઞ્ચભાસકત્વેન પ્રત્યગાત્મા સર્વગઃ, સર્વગતો ભવામીત્યર્થઃ, બહુયોજનદૂરવર્તિચન્દ્રસૂર્યમણ્ડલમ્, તતોઽપ્યતિદૂરવર્તિ ધ્રુવાદિ નક્ષત્રાણિ ચ પ્રત્યગાત્મનો ભાસન્તે, તચ્ચ ભાનં જડાનાં તેષાં સ્વતો ન સમ્ભવતિ, કિન્તુ સ્વપ્રકાશરૂપાત્મચૈતન્યસમ્બન્ધબલેનૈવ તદ્ વક્તવ્યમ્, સ્વતોઽપ્રકાશસ્ય ઘટાદેઃ સ્વપ્રકાશદીપાદિસમ્બન્ધબલેનૈવ પ્રકાશદર્શનાત્ ।

અથ પ્રત્યગાત્માત્રૈવ તિષ્ઠેત્ કથં ધ્રુવાદિના સમ્બધ્યેત, તતો ધ્રુવાદિભાસકત્વાત્ પ્રત્યગાત્મા સર્વગતઃ, પરિચ્છિન્નતાપ્રતીતિશ્ચાત્મનોઽભિવ્યઞ્જકોપાધિપરિચ્છેદાદ્ ભ્રાન્ત્યોપપદ્યતે। તદુક્તં બ્રહ્મગીતાયામ્ –

“સ્વયં ભાતુમશક્તં હિ જડાત્મકમિદં જગત્ ।
ચિત્સમ્બન્ધબલેનૈવ ખલુ ભાતિ ન ચાન્યથા ॥

સ્વાભિવ્યઞ્જકસઙ્કોચાત્ પ્રતિભાત્મનઃ ।

ન સ્વરૂપેણ ચિદ્રૂપઃ સર્વવ્યાપી સદા ખલુ" ॥ ઇતિ।

તતો જીવાત્મા બ્રહ્મૈવેતિ ભાવઃ ॥ ૬॥

નનુ જીવસ્ય બ્રહ્માભેદોઽસઙ્ગતઃ, બ્રહ્મણ એવાસિદ્ધેઃ ।
દેશકાલવસ્તુપરિચ્છેદશૂન્યં વસ્તુ હિ બ્રહ્મેત્યુચ્યતે ।
ન ચ તત્ સમ્ભવતિ, કાલાકાશાદેર્દ્વિતીયસ્ય વિદ્યમાનત્વેન
વસ્તુપરિચ્છેદાભાવસ્યાસિદ્ધેઃ, ન ચાકાશાદેર્બ્રહ્મણ્યારોપિતત્વેન
મિથ્યાત્વાત્ તેન તસ્ય ન દ્વિતીયત્વમિતિ વાચ્યમ્, આકાશાદેરધ્યસ્તત્વે
માનાભાવાત્ । ન ચ "આત્મન આકાશઃ સમ્ભૂતઃ" ઇતિ શ્રુતિસ્તત્ર
માનમિતિ વાચ્યમ્, તત્રાકાશાદેર્બ્રહ્મકાર્યતામાત્રપ્રતીતેઃ, ઇત્યાશઙ્ક્ય
બ્રહ્મણોઽદ્વિતીયત્વસિદ્ધ્ય આકાશાદેરધ્યસ્તત્વં સાધયતિ –

ન હિ ભાનાદૃતે સત્ત્વં નર્તે ભાનં ચિતોઽચિતઃ ।
ચિત્સમ્ભેદોઽપિ નાધ્યાસાદૃતે તેનાહમદ્વયઃ ॥ ૭॥

ન હીતિ । ભાનાદૃતે પ્રકાશં વિના પદાર્થસ્ય સત્ત્વં સદ્ભાવો
નાસ્તિ, અપ્રકાશમાનશશવિષણાદેઃ સત્ત્વાદર્શનાદિત્યર્થઃ ।
તતઃ કિં તત્રાહ, નર્ત ઇત્યાદિના અચિતો જડસ્ય ચિત ઋતે
ચૈતન્યસ્ય સમ્બન્ધં વિના ભાનં પ્રકાશો નાસ્તિ સ્વતો ભાનવત્ત્વે
જડત્વાભાવપ્રસઙ્ગાદિત્યર્થઃ । તતોઽપિ કિં તત્રાહ, ચિત્સંભેદ
ઇત્યાદિના, ચિત્સંભેદોઽપિ ચૈતન્યસમ્બન્ધોઽપ્યધ્યાસાદૃતે
ચિત્યારોપિતત્વં વિના જડસ્ય ન સમ્ભવતીત્યર્થઃ । અયં ભાવઃ –
ચિજ્જડયોરાધ્યાસિકસમ્બન્ધાતિરિક્તં સમ્બન્ધં વદન્ વાદી પ્રષ્ટવ્યઃ,
કિં તયોઃ સમ્બન્ધઃ? સંયોગઃ, ઉત સમવાયઃ, અથ તાદાત્મ્યમ્, અથવા
વિષયવિષયિભાવ ઇતિ ।

નાદ્યઃ, ચિતોઽદ્રવ્યત્વેન સંયોગાનુપપત્તેઃ, ગુણાશ્રયસ્યૈવ દ્રવ્યત્વાત્,
ચિતો નિર્ગુણત્વાત્ ।

નાપિ સમવાયઃ, ચિજ્જડયોર્ગુણગુણ્યાદિષ્વન્યતમત્વાભાવાત્ ।

નનુ ચિજ્જડયોઃ કાર્યકારણભાવાત્ તન્તુપટયોરિવ સમવાયોઽસ્ત્વિતિ
ચેત્, ન, તન્તુપટયોઃ સમવાયેઽવયવાવયવિતાયા એવ પ્રયોજકત્વેન
કાર્યકારણભાવસ્યાપ્રયોજકત્વાત્, અન્યથા તુરીપટયોરપિ
સમવાયપ્રસઙ્ગાત્, અવયવાવયવિતાયાશ્ચ દૃગ્દૃશ્યયોરભાવાત્ ।

નાપિ તાદાત્મ્યમ્, પરસ્પરવિલક્ષણયોસ્તયોસ્તાદાત્મ્યાસમ્ભવાત્ ।

નાપિ વિષયવિષયિભાવઃ, તસ્ય મૂલસમ્બન્ધપૂર્વકત્વાત્, તદસમ્ભવસ્ય ચોક્તત્વાત્, અન્યથાતિપ્રસઙ્ગાત્, તદુક્તં સર્વજ્ઞાત્મમુનિભિઃ –

“ન સંકરો નાપિ ચ સંયુતિસ્તયો-
ર્ન ચાસ્તિ તદ્વત્ સમવાયસમ્ભવઃ ।
અતો ન ચિચ્ચૈત્યસમન્વયં પ્રતિ
પ્રતીયતે કાચન મૂલસઙ્ગતિઃ” ॥ ઇતિ ।

તતસ્તયોરાધ્યાસિક એવ સમ્બન્ધ ઇતિ વાચ્યમ્, તથા ચ જડપદાર્થભાનાન્યથાનુપપત્તિરેવાકાશાદિરધ્યસ્તત્વે પ્રમાણમ્, તદપિ તૈરેવોક્તમ્,

“તતો વિયન્મુખ્યમદો જગજ્જડં
ચિદાત્મનોઽસ્યૈવ વિવર્ત ઇષ્યતામ્ ।
અનાદ્યવિદ્યાપટસંવૃતાત્મન-
સ્તદોપલભ્યત્વમમુષ્ય કલ્પ્યતે” ॥ ઇતિ ।

તેનાકાશાદેરધ્યસ્તત્વેનાહં પ્રત્યગભિન્નઃ પરમાત્માદ્વયઃ, અદ્વિતીય ઇત્યર્થઃ । તતશ્ચ બ્રહ્મણો વસ્તુપરિચ્છેદાભાવેન ત્રિવિધપરિચ્છેદશૂન્યત્વં સિદ્ધમિત્યર્થઃ । તદુક્તં વિદ્યારણ્યગુરુભિઃ પઞ્ચકોશવિવેકે –

“દેશકાલાન્યવસ્તૂનાં કલ્પિતત્વાચ્ચ માયયા ।
ન દેશાદિકૃતોઽન્તોઽસ્તિ બ્રહ્માનન્ત્યં સ્ફુટં તતઃ” ॥ ઇતિ ॥ ૭॥

નનુ સ્થૂલોઽહં કૃશોઽહં કાણોઽહં બધિરોઽહં મૂકોઽહં બુભુક્ષિતોઽહં પિપાસિતોઽહં મન્તાહં નિશ્ચિતોઽહમ્, ઇતિ દેહાદિરૂપેણાનુભૂયમાનસ્ય પ્રતીચઃ કથં ચિદેકરસબ્રહ્મતા, ઇત્યાશઙ્ક્ય દેહાદીનામનાત્મત્વં પ્રત્યેકં સાધયતિ –

ન દેહો નેન્દ્રિયં ચાહં ન પ્રાણો ન મનો ન ધીઃ ।
મમતાપરિરબ્ધત્વાદાક્રીડત્વાદિદં ધિયઃ ॥ ૮॥

ન દેહ ઇતિ । દેહઃ સશિરસ્કઃ પિણ્ડઃ, ઇન્દ્રિયમ્ દ્વિવિધમ્, જ્ઞાનસાધનં ચક્ષુરાદિ, કર્મ સાધનં પાણ્યાદિ ચ, પ્રાણઃ

પઞ્ચવૃત્તિઃ, મનઃ સંશયાત્મકમ્, ધીર્બુદ્ધિર્નિશ્ચયાત્મિકા, અહંશબ્દસ્ય દેહાદિભિઃ પ્રત્યેકં સમ્બન્ધઃ, એતે દેહાદયો બુદ્ધિપર્યન્તાઃ પઞ્ચાપિ પદાર્થા અનાત્માન ઇત્યર્થઃ । કુત ઇત્યત આહ, મમતેત્યાદિના । મમતાપરિરબ્ધિત્વાદિદં ધિયઃ, આક્રીડત્વાચ્ચ, મમતયા મમેતિબુદ્ધ્યા પરિરબ્ધત્વાદાલિઙ્ગિતત્વાદ્ વિષયીકૃતત્વાદિતિ યાવત્ । ઇદં ધિય ઇદં બુદ્ધેઃ, આક્રીડત્વાલ્લીલાસ્થાનત્વાદિદંબુદ્ધિવિષયત્વાદિત્યર્થઃ । અત્રેદમનુમાનં વિવક્ષિતમ્ । દેહાદયઃ પ્રત્યેકમનાત્માનઃ, મમતાબુદ્ધિવિષયત્વાદિદંબુદ્ધિવિષયત્વાચ્ચ, ઘટાદિવદિતિ । દેહોઽનાત્મા, રૂપાદિમત્વાત્, ઘટવત્, ઇન્દ્રિયાણ્યનાત્માનઃ, કરણત્વાત્, કુઠારવત્, પ્રાણોઽનાત્મા, વાયુત્વાત્, બાહ્યવાયુવત્, દેહોઽહમિત્યાદિપ્રતીત્યભાવાચ્ચાનાત્મત્વં પઞ્ચાનામ્ । કૃશોઽહમિત્યાદિપ્રતીતિસ્તુ રક્તઃ સ્ફટિક ઇત્યાદિપ્રતીતિવદાત્મનિ દેહાદિધર્માધ્યાસાદપ્યુપપદ્યતે, નાપિ તત્સંઘાતસ્યાપ્યાત્મત્વમ્, અનાત્મસમુદાયસ્તત્સંઘાતોઽપિ નાત્મા, અનાત્મત્વાત્, ગૃહાદિવદિતિ ભાવઃ ॥ ૮॥

નન્વહઙ્કારસ્યાત્મત્વમસ્તુ, તસ્ય મમેદંબુદ્ધિવિષયત્વાભાવાત્, ઇત્યાશઙ્ક્ય સુષુપ્ત્યાદાવાત્મનિ વિદ્યમાનેઽપ્યહઙ્કારસ્યાભાવાન્ન તયોરૈક્યમિત્યભિપ્રેત્ય પ્રકારાન્તરેણ તયોર્ભેદં સાધયતિ –

સાક્ષી સર્વાન્વિતઃ પ્રેયાનહં નાહં કદાચન ।
પરિણામપરિચ્છેદપરિતાપૈરુપપ્લવાત્ ॥ ૯॥

સાક્ષીતિ । સાક્ષી ચિદ્રૂપોઽન્તઃકરણપરિણામરાગદ્વેષાદિદ્રષ્ટા, સર્વાન્વિતઃ સર્વત્ર ઘટપટાદિષ્વન્વિતઃ, ઘટઃ સ્ફુરતિ, પટઃ સ્ફુરતિ, ઇતિ સ્ફુરણસ્ય સર્વત્રાનુગતત્વેનાનુભવાત્, પ્રેયાન્ પ્રિયતમ આનન્દરૂપઃ, તસ્યૈવ પ્રેયસ્ત્વાત્, અનુભૂયતે હ્યાત્મનઃ પ્રિયતમત્વમ્, અહં સર્વદા ભૂયાસં ન કદાચિન્નાભૂવમિત્યાત્મનિ સર્વેષાં પ્રાર્થનાદર્શનાદિત્યર્થઃ । એવમ્ભૂતોઽહં પ્રત્યગાત્મા કદાચન કદાચિદપિ નાહં નાહઙ્કારો ભવામીત્યર્થઃ । તત્ર હેતુમાહ, પરિણામેત્યાદિના, અહઙ્કારસ્ય પરિણામપરિચ્છેદપરિતાપૈઃ । પરિણામો રાગદ્વેષાદિપરિણામઃ, પરિચ્છેદઃ પરિમિતત્વમ્, પરિતાપો દુઃખાદિઃ, એતૈસ્ત્રિભિરુપપ્લવઃ સમ્બન્ધઃ, તસ્માદિત્યર્થઃ । દ્રષ્ટૃદૃશ્યભાવેન સર્વગતત્વપરિચ્છિન્નત્વાદ્યાકારેણાનન્દરૂપિત્વદુઃખિત્વાકારેણ

ચાનુભૂયમાનત્વાદહઙ્કારાત્મનોર્ભેદઃ સ્ફુટ ઇત્યર્થઃ ।
કિમિતિ તર્હિ તયોર્ભેદઃ સર્વૈર્નાનુભૂયત ઇતિ
ચેત્, અહઙ્કારાત્મનોસ્તપ્તાયઃપિણ્ડવદવિવેકેન
દૃઢમેકતયાઽધ્યસનાન્નાનુભૂયત ઇતિ ગૃહાણેત્યભિપ્રાયઃ ॥ ૯॥

નન્વેવમપિ સંસારિણ આત્મનઃ કથં નિત્યમુક્તબ્રહ્મતા । ન ચ
સંસારોઽહઙ્કારસ્યૈવ નાત્મન ઇતિ વાચ્યમ્, આત્માહઙ્કારોભયસન્નિધાને
પ્રતીયમાનસ્ય સંસારસ્યાહઙ્કારૈકસમ્બન્ધિત્વે માનાભાવાત્,
ઇત્યાશઙ્ક્યાન્વયવ્યતિરેકાવેવ તત્ર માનમિત્યાહ –

સુપ્તેઽહમિ ન દૃશ્યન્તે દુઃખદોષપ્રવૃત્તયઃ ।
અતસ્તસ્યૈવ સંસારો ન મે સંસર્તૃસાક્ષિણઃ ॥ ૧૦॥

સુપ્તેઽહમીતિ । અહમ્યહઙ્કારે સુપ્ત ઉપરતે સતિ સુષુપ્તિમૂર્ચ્છાદૌ
દુઃખદોષપ્રવૃત્તયઃ, દુઃખં ચ, દોષા રાગાદયશ્ચ,
તત્કાર્યભૂતા પ્રવૃત્તિશ્ચ, દુઃખદોષપ્રવૃત્તયઃ, તા ન
દૃશ્યન્તે યતોઽતસ્તસ્યૈવાહઙ્કારસ્ય સંસારઃ, સંસર્તૃસાક્ષિણઃ
સંસર્તૃરહઙ્કારસ્ય સાક્ષિણો મે મમ પ્રત્યગાત્મનો ન સંસાર
ઇત્યર્થઃ । અહઙ્કારે સતિ જાગ્રત્સ્વપ્નયોઃ સંસારદર્શનાત્ ।
તદભાવે ચ સુષુપ્ત્યાદૌ કેવલ આત્મનિ સંસારાદર્શનાત્ ।
અહઙ્કારસમ્બન્ધ્યેવ સંસાર આત્મન્યપિ તદવિવેકાત્ પ્રતીયતે, યથા
દાહકત્વમગ્નિસમ્બન્ધ્યેવ સત્ તદવિવેકાદયસ્યાપિ પ્રતીયતે । યથા
વા રક્તિમા જપાકુસુમસમ્બન્ધ્યેવ સન્નવિવેકાત્ સ્ફટિકેઽપિ પ્રતીયતે,
તદ્વદાત્મન્યપ્યહઙ્કારોપાધિવશાદેવ સંસારઃ પ્રતીયતે, ન સ્વતઃ,
સુષુપ્ત્યાદાવદર્શનાત્ । તદુક્તં સર્વજ્ઞમુનિભિઃ –

"કર્ત્રાદિસંનિધિબલેન તવાપિ કર્તૃ-
ભોક્તૃપ્રમાતૃવપુરાપતતિ ભ્રમેણ ।
તદ્બુધિસંશ્રયમનાત્મગતં પ્રતીચિ
શુદ્ધેઽપિ પશ્યતિ તમઃપટલાવૃતાક્ષઃ । ઇતિ।

અત આત્મા નિત્યમુક્તં બ્રહ્મૈવેત્યભિપ્રાયઃ ॥ ૧૦॥

નન્વેવમપ્યાત્મનો જાગ્રદાદ્યવસ્થાવત્ત્વં વક્તવ્યમ્,
અહઙ્કારસ્ય સુષુપ્તાવભાવેન સુષુપ્ત્યવસ્થાવત્ત્વાનુપપત્તૌ
જાગ્રત્સ્વપ્નાવસ્થાદ્વયસમ્બન્ધિત્વસ્યાપ્યનુપપત્તેસ્તાસાં

તિસૃણામપ્યેકાશ્રયત્વનિયમાદિત્યાશઙ્ક્યાહઙ્કારસ્ય સુષુપ્તૌ સંસ્કારરૂપેણ વર્તમાનત્વાત્ તસ્યૈવ સુષુપ્તિર્નાત્મનઃ, તસ્ય સુષુપ્તિસાક્ષિત્વાત્ । તતો જાગ્રત્સ્વપ્નાવપ્યહઙ્કારસ્યૈવેત્યભિપ્રેત્યાહ –

સુપ્તઃ સુપ્તિં ન જનાતિ નાઽસુપ્તે સ્વપ્નજાગરૌ ।
જાગ્રત્સ્વપ્નસુષુપ્તીનાં સાક્ષ્યતોઽહમતદૃશઃ ॥ ૧૧॥

સુપ્ત ઇતિ । યઃ સુપ્તઃ સુપ્તિં ન જાનાતિ, ન વેત્તિ, સોઽહઙ્કાર એવ સુપ્તઃ સુષુપ્ત્યવસ્થાવાન્ નૈવાત્મા, કુતઃ ? સુષુપ્તિતાત્કાલિકાજ્ઞાનસાક્ષિતયા જાગરૂકત્વાદિત્યર્થઃ । તતશ્ચાસુપ્તે સુષુપ્ત્યવસ્થારહિતે પ્રત્યગાત્મનિ સ્વપ્નજાગરૌ ન ભવતઃ, તયોઃ સુષુપ્ત્યવસ્થાસમાનાશ્રયત્વાદિત્યર્થઃ । હેત્વન્તરમપ્યાહ, જાગ્રદિત્યાદિના, યતો જાગ્રત્સ્વપ્નસુષુપ્તીનાં સાક્ષી દ્રષ્ટા, અતોઽહમાત્મા અતદૃશઃ, તા જાગ્રદાદ્યા દશા અવસ્થા યસ્ય સ તદૃશઃ, તદૃશો ન ભવતીત્યતદૃશઃ જાગ્રદાદ્યવસ્થારહિત ઇત્યર્થઃ । અત્રેદમનુમાનં વિવક્ષિતમ્, આત્મા જાગ્રદાદ્યવસ્થાવાન્ ન ભવતિ, જાગ્રદાદ્યવસ્થાસાક્ષિત્વાત્, યો યત્સાક્ષી ન સ તદ્ધર્મવાન્, યથા ઘટસાક્ષી ન ઘટધર્મવાનિતિ । તદુક્તમન્વર્થં નામ સર્વજ્ઞાત્મમુનિભિઃ –

“તિસ્રોઽપિ ચિદ્ઘનતનોસ્તવ દૃશ્યભૂતા
દૂરે ચકાસતિ મતેર્બહિરેવ તાવત્ ।
આવિસ્તિરોભવનધર્મતયા હ્યવસ્થાઃ
કઃ સંકરો વિમલચિદ્વપુષસ્તવાભિઃ” ॥ ઇતિ॥ ૧૧॥

જાગ્રદાદ્યવસ્થાલક્ષણપર્યાલોચનયાપિ નાત્મનોઽવસ્થાસમ્બન્ધ ઇત્યાહ –

વિજ્ઞાનવિરતિઃ સુપ્તિસ્તજ્જન્મ સ્વપ્નજાગરૌ ।
તત્સાક્ષિણઃ કથં મે સ્યુર્નિત્યજ્ઞાનસ્ય તે ત્રયઃ ॥ ૧૨॥

વિજ્ઞાનેતિ । વિજ્ઞાનવિરતિર્વિજ્ઞાનસ્ય વિશેષજ્ઞાનસ્ય વિરતિરુપરતિઃ સુપ્તિરિત્યુચ્યતે, તજ્જન્મ તસ્ય વિશેષજ્ઞાનસ્ય જન્મોત્પત્તિ, સ્વપ્નજાગરાવિત્યુચ્યેતે, તત્રાપિ વાસનામયપ્રપઞ્ચવિજ્ઞાનં સ્વપ્નઃ, સ્થૂલપ્રપઞ્ચવિજ્ઞાનં જાગ્રદિતિ વિભાગ ઇત્યર્થઃ । તતઃ કિં તત્રાહ, તત્સાક્ષિણિ ઇત્યાદિના । નિત્યજ્ઞાનસ્યાલુપ્તચિદ્રૂપસ્ય

તત્સાક્ષિણ ઉક્તલક્ષણસુષુપ્ત્યાદિસાક્ષિણો મે મમાત્મનસ્તે ત્રયઃ સુષુપ્તિસ્વપ્નજાગરાઃ કથં સ્યુઃ, ન કથંચિદિત્યર્થઃ । અયં ભાવઃ – સુષુપ્ત્યવસ્થાયાં તાવત્ સુષુપ્તિતાત્કાલિકાજ્ઞાનાવભાસકં કિંચિત્ચૈતન્યમઙ્ગીકાર્યં સર્વૈરપિ, અન્યથા ઉત્થિતસ્ય પુરુષસ્ય સુખમહમસ્વાપ્સં ન કિઞ્ચિદવેદિષમિતિ સુષુપ્તિતાત્કાલિકાજ્ઞાનપરામર્શાનુપપત્તેસ્તચ્ચૈતન્યં ન જન્યમ્ મનશ્ચક્ષુરાદેઃ સુપ્ત્યન્તઃપાતિત્વાદનન્તં ચ તદજન્યભાવસ્ય નિત્યત્વનિયમાત્, તચ્ચૈતન્યમસ્માભિરાત્મેત્યુચ્યતે । તથા ચ કથમનાદિનિત્યજ્ઞાનસ્વરૂપસ્યાત્મનો જ્ઞાનોપરમરૂપા સુષુપ્તિઃ, જ્ઞાનોત્પત્તિરૂપૌ સ્વપ્નજાગરૌ ચ સ્યુઃ, અહઙ્કારસ્ય તુ જન્યવૃત્તિરૂપજ્ઞાનાશ્રયત્વાત્ તત્ત્રયમુપપદ્યતે । તતશ્ચાત્મા જાગ્રદાદ્યવસ્થારહિત ઇતિ ॥ ૧૨॥

ઇદાનીમાત્મનો નિર્વિકારબ્રહ્માભેદાય ષડ્ભાવવિકારરાહિત્યં સાધયતિ –

ષડ્વિકારવતાં વેત્તા નિર્વિકારોઽહમન્યથા ।
તદ્વિકારાનુસન્ધાનં સર્વથા નાવકલ્પતે ॥ ૧૩॥

ષડ્વિકારેતિ । ષડ્વિકારવતાં ષડ્ભાવવિકારવતાં, ષટ્ ચ તે ભાવવિકારાશ્ચ ષડ્ભાવવિકારાઃ, જાયતે, અસ્તિ, વર્ધતે, વિપરિણમતે, અપક્ષીયતે, વિનશ્યતિ, ઇત્યુક્તાઃ । તે યેષાં સન્તિ તે ષડ્ભાવવિકારવન્તસ્તેષાં બાહ્યઘટાદીનામ્, આન્તરબુદ્ધ્યાદીનાં ચ, વેત્તા જ્ઞાતાહમાત્મા નિર્વિકારો વિકારરહિતો ભવામિ। આત્મા હિ બાહ્યાન્તરવસ્તૂનામુત્પત્યાદિવિકારાન્ જાનાતિ, અતો નિર્વિકરો ભવિતુમર્હતિ, યો યજ્જાનાતિ ન સ તદ્ધર્મવાનિતિ વ્યાપ્તેર્લોકસિદ્ધત્વાદિત્યર્થઃ । તદુક્તં વાર્તિકકૃતા –

“નર્તે સ્યાદ્વિક્રિયાં દુઃખી સાક્ષિતા કા વિકારિણઃ ।
ધીવિક્રિયાસહસ્રાણાં સાક્ષ્યતોઽહમવિક્રિયઃ” ॥ ઇતિ।

વિપક્ષે દોષમાહ – અન્યથેત્યાદિના । અન્યથા વિકારસાક્ષિણોઽપિ વિકારિત્વે તદ્વિકારાનુસન્ધાનં, તેષાં વિકારિવસ્તૂનાં યે વિકારાસ્તેષામનુસન્ધાનં સર્વથા સર્વપ્રકારેણાપિ નાવકલ્પતે, ન સમ્ભવતીત્યર્થઃ । અયમભિસન્ધિઃ – આત્મનોઽપિ વિકારિત્વે કિમાત્મન

ઇતરેષાં ચ વિકારા આત્મના જ્ઞાયન્તે, ઉતેતરૈઃ, નોભયથાપિ, વિકારિવસ્તુનો મૃદાદિવજ્જડત્વનિયમાદિતિ ॥ ૧૩॥

કિઞ્ચ, વિકારિવસ્તુનો વિકારાણાં ચ કિં ભેદ ઉતાભેદઃ? નાદ્યઃ, ભિન્નયોર્ગવાશ્વયોરિવ વિકારવિકારિભાવાનુપપત્તેઃ, ઇત્યભિપ્રેત્ય દ્વિતીયપક્ષે દૂષણમાહ –

તેન તેન હિ રૂપેણ જાયતે લીયતે મુહુઃ ।
વિકારિ વસ્તુ તસ્યૈષામનુસન્ધાતૃતા કુતઃ ॥ ૧૪॥

તેનેતિ । તેન તેન રૂપેણોત્પત્ત્યાદિવિકારરૂપેણ તદભિન્નં વિકારિ વસ્ત્વપિ જાયત ઉત્પદ્યતે, મુહુઃ શશ્વલ્લીયતે, નશ્યતિ ચ, તયોરભેદાદિત્યર્થઃ । હિ યસ્માદેવં તસ્માત્ તસ્ય વિકારિવસ્તુન એષાં વિકારાણામનુસન્ધાતૃતા કુતઃ, અનુસન્ધાનં કુતઃ, ન કુતોઽપિ ભવેદિત્યર્થઃ । તત્તદ્વિકારરૂપેણ તદા તદા નશ્યતો વિકારિવસ્તુનઃ કથં કાલાન્તરીયં વિકારાનુસન્ધાનં ઘટતે, ન કથઞ્ચિદિત્યર્થઃ ॥ ૧૪॥

નન્વાત્મા સ્વયં વિકારી સન્નપ્યાત્મન ઇતરેષાં ચ વિકારાન્ વિજાનાતુ, ન ચ તસ્ય વિકારિત્વાવિશેષે કથં સ્વેતરપરિજ્ઞાનમિતિ વાચ્યમ્, શિલાત્વાવિશેષેઽપિ રત્નસ્ય સ્વભાવવિશેષેણ સ્વેતરાવભાસકત્વવદાત્મનોઽપિ સ્વભાવવિશેષેણ સ્વેતરવિકારાનુસન્ધાનોપપત્તેઃ । ન ચ તેન તેન વિકારેણ સાકં નષ્ટસ્ય કથં સર્વવિકારાનુસન્ધાનમિતિ વાચ્યમ્, તસ્ય વિકારિણ આત્મનો વિકારૈરત્યન્તાભેદસ્યાનઙ્ગીકારાત્, કિં ત્વીષદ્ભેદઘટિતાભેદસ્ય તાદાત્મ્યસ્યૈવ તન્તુપટયોરિવાઙ્ગીકારાત્, ઇત્યાશઙ્ક્ય, એવમપ્યાત્મન આદ્યન્તવિકારદ્વયાનુસન્ધાનં ન સમ્ભવતીત્યાહ –

ન ચ સ્વજન્મ નાશં વા દ્રષ્ટુમર્હતિ કશ્ચન ।
તૌ હિ પ્રાગુત્તરાભાવચરમપ્રથમક્ષણૌ ॥ ૧૫॥

ન ચેતિ । કશ્ચન કશ્ચિન્નિપુણોઽપિ સ્વજન્મ સ્વોત્પત્તિં નાશં ધ્વંસં વા દ્રષ્ટું જ્ઞાતું નાર્હતિ, ન શક્નોતીત્યર્થઃ । તત્ર હેતુમાહ – તૌ હીત્યાદિના, હિ યસ્માત્ તૌ જન્મનાશૌ પ્રાગુત્તરાભાવચરમપ્રથમક્ષણૌ, પ્રાગુત્તરૌ યાવભાવૌ પ્રાગભાવપ્રધ્વંસાભાવૌ તયોર્યૌ ચરમપ્રથમક્ષણૌ, તૌ પ્રાગુત્તરાભાવચરમપ્રથમક્ષણૌ પ્રાગભાવચરમક્ષણ

ઉત્પત્તિર્વસ્તુનઃ પ્રધ્વંસાભાવપ્રથમક્ષણૌ નાશ ઇત્યર્થઃ ।
યસ્માજ્જન્મનાશૌ પ્રાગુત્તરાભાવચરમપ્રથમક્ષણૌ તસ્માત્
સ્વજન્મ નાશં વા દ્રષ્ટું નાર્હતીતિ સમ્બન્ધઃ । ઇદમત્રાકૂતમ્
– આત્મા હિ સ્વસમાનકાલિકવસ્ત્વેવ જાનાતીતિ વક્તવ્યમ્, દીપ ઇવ
સ્વસમાનકાલિકપદાર્થાવભાસકઃ, તથા ચાવસ્થાનસમયેઽવિદ્યમાનયોઃ
પ્રાગભાવપ્રધ્વંસાભાવયોઃ પરિજ્ઞાનાભાવે કથં
પ્રાગભાવચરમક્ષણરૂપં સ્વજન્મ, પ્રધ્વંસાભાવપ્રથમક્ષણરૂપં
નાશં ચ, જાનીયાત્ ન કથંચિદપીત્યર્થઃ ।
તયોશ્ચાસિદ્ધૌ મધ્યમવર્તિવિકારાણામપ્યસિદ્ધિરેવ। તેષામપિ
વિકારાણામુત્પત્તિનાશસમાનાશ્રયત્વનિયમાત્ । તદુક્તં વાક્યવૃત્તૌ
ભાષ્યકારૈઃ –

> "દેહેન્દ્રિયમનઃપ્રાણાહઙ્કૃતિભ્યો વિલક્ષણઃ ।
> પ્રોજ્ઝિતાશેષષડ્ભાવવિકારસ્ત્વંપદાભિધઃ" ॥ ઇતિ ।

તતશ્ચાત્મા નિર્વિકારત્વાદ્ બ્રહ્મૈવેત્યર્થઃ ॥ ૧૫॥

નનુ પૂર્વોક્તં સર્વં વૃથા, આત્મન ઉક્તસ્વરૂપબ્રહ્મત્વજ્ઞાને
પ્રયોજનાભાવાત્ । ન ચ સંસારનિવૃત્તિરાત્મનો બ્રહ્મત્વજ્ઞાને
પ્રયોજનમિતિ વાચ્યમ્, તન્નિવૃત્તેરસમ્ભવાત્ । સંસારો
હ્યાત્મન્યહઙ્કારોપાધિના પ્રતીયમાનઃ કર્તૃત્વાદિભિઃ, સ ચ ન જ્ઞાનેન
નિવર્તયિતું શક્યઃ, તસ્યાત્મનિ સોપાધિકભ્રમત્વાત્, સોપાધિકભ્રમસ્ય
ચ યાવદુપાધ્યવસ્થાનમ્, તત્ત્વજ્ઞાનેઽપ્યવસ્થાનાત્, લોકે
સોપાધિકભ્રમસ્ય પ્રતિબિમ્બચલનાદેર્યાવદુપાધિચલનં પ્રતીતેઃ ।
ન ચોપાધેરહઙ્કારસ્ય બ્રહ્મજ્ઞાનેન નિવૃત્તૌ તત્પ્રયુક્તસ્યાત્મનિ
પ્રતીયમાનસ્ય કર્તૃત્વાદેરપિ નિવૃત્તિરિતિ વાચ્યમ્, તસ્ય મૂલાજ્ઞાને
સતિ નિવૃત્તેરસમ્ભવાત્ । ન ચ મૂલાજ્ઞાનસ્યાપ્યાત્મનિ વિદ્યમાનસ્ય
બ્રહ્મજ્ઞાનાન્નિવૃત્તિરિતિ વાચ્યમ્, તસ્ય કલ્પકાભાવેનાકલ્પિતતયા
જ્ઞાનેન નિવર્તયિતુમશક્યત્વાત્, અન્યથાજ્ઞાનસ્યાનવસ્થાનપ્રસઙ્ગાત્,
ઇત્યાશઙ્ક્યાજ્ઞાનસ્ય જ્ઞાનનિવર્ત્યત્વસિદ્ધ્યે કલ્પિતત્વં વક્તું
તસ્યાત્મનિ વસ્તુતોઽસમ્ભવમાહ –

> ન પ્રકાશેઽહમિત્યુક્તિર્યત્પ્રકાશૈકબન્ધના ।
> સ્વપ્રકાશં તમાત્માનમપ્રકાશઃ કથં સ્પૃશેત્ ॥ ૧૬॥

ન પ્રકાશેતિ । અહં ન પ્રકાશેન ભામીત્યુક્તિર્વચનં યત્પ્રકાશૈકબન્ધના, યસ્ય પ્રકાશો યત્પ્રકાશઃ, સ્વરૂપપ્રકાશ એક એવ નિબન્ધનં નિમિત્તં યસ્યાઃ સા તથોક્તા, ન પ્રકાશ ઇતિ વ્યવહારસ્ય પ્રકાશૈકનિબન્ધનત્વાત્, સ્વપ્રકાશાનુભવનિમિત્તત્વાદિત્યર્થઃ । તં સ્વપ્રકાશં સ્વયમેવ ભાસમાનમાત્માનમપ્રકાશોઽજ્ઞાનં કથં સ્પૃશેદાવૃણુયાત્, ન કથઞ્ચિદિત્યર્થઃ ।

અયં ભાવઃ । આત્મા સર્વદા સ્વયંભાસમાનઃ સર્વં ભાસયતિ, સ કથમજ્ઞાનેન પ્રકાશવિરોધિના સ્પૃશ્યેત, ન હિ ખરતરકિરણશાલી દિનકરસ્તમસા સ્પૃશ્યમાનો દૃશ્યતે, તત્ કસ્ય હેતોઃ, પ્રકાશાપ્રકાશયોર્વિરોધાત્, તથા ચાજ્ઞાનસ્યાત્મનિ યુક્ત્યસહત્વાન્ન પરમાર્થતઃ સમ્ભવ ઇતિ। ॥ ૧૬॥

નનુ કથં તર્હિ ન પ્રકાશ ઇત્યાત્મન્યજ્ઞાનાનુભવ ઇત્યાશઙ્ક્ય સૂર્યે પેચકાદીનામન્ધકારપ્રતીતિવદ્ભીત્યાપ્યુપપદ્યત ઇત્યાહ –

તથાપ્યાભાતિ કોઽપ્યેષ વિચારાભાવજીવનઃ ।
અવશ્યાયશ્ચિદાકાશે વિચારાર્કોદયાવધિઃ ॥ ૧૭॥

તથાપીતિ । યદ્યપિ વસ્તુત આત્મન્યજ્ઞાનં ન સમ્ભવતિ, તથાપ્યેષોઽપ્રકાશ અવશ્યાયો નીહારઃ, અવશ્યાયવદવશ્યાયઃ, આવરકત્વાત્, ચિદાકાશે ચિત્પ્રકાશ આત્મન્યાભાતીતિ સમ્બન્ધઃ ।

નન્વજ્ઞાનસ્ય વસ્તુતોઽસત્ત્વે કથં પ્રત્યક્ષપ્રતીતિઃ, ન હ્યસતઃ શશવિષાણાદેઃ પ્રત્યક્ષપ્રતીતિરસ્તિ, તત્રાહ કોઽપીતિ, કોઽપિ સત્ત્વાસત્ત્વાભ્યામનિર્વચનીયોઽપ્રકાશસ્યાસત્સદ્વિલક્ષણત્વાઙ્ગીકારાન્ન પ્રત્યક્ષપ્રતીત્યનુપપત્તિરિત્યર્થઃ ।

નન્વેવમપ્યપ્રકાશસ્યાત્મન્યનુભવો નોપપદ્યતે, વિરોધાદિતિ ચેત્, ન, તથા હિ કિં જડવસ્ત્વપ્રકાશવિરોધિ, ઉત સ્વપ્રકાશરૂપ આત્મા? નાદ્યઃ, જડાપ્રકાશયોઃ પરસ્પરવિરોધાસમ્ભવત્ । નાપિ દ્વિતીયઃ, તસ્ય વિરોધિનિ સ્વપ્રકાશ આત્મન્યવસ્થાનાનુપપત્તેઃ । ન ચાહં ન પ્રકાશ ઇત્યજ્ઞાનસાધકસ્ય તસ્ય નાજ્ઞાનવિરોધિત્વમિતિ વાચ્યમ્, આત્મસ્વરૂપસ્ય પ્રકાશસ્યાવિરોધિત્વેઽન્યસ્યાપિ વિરોધિનોઽભાવાત્ કદાપિ નિવૃત્તિર્ન સ્યાત્, તત્રાહ વિચારાર્કોદયાવધિરિતિ। વિચારો વિચારજન્યં જ્ઞાનમેવાર્કઃ સૂર્યઃ, તમોનિવર્તકત્વાત્, તસ્યોદય ઉત્પત્તિઃ,

સાવધિઃ સ્થિતિર્મર્યાદા યસ્યાપ્રકાશસ્ય સઃ, વિચારર્કોદયાવધિરિત્યર્થઃ ।
કેવલાત્મનોઽવિરોધિત્વેઽપ્યખણ્ડાકારવૃત્ત્યારૂઢાત્મચૈતન્યસ્ય
તન્નિવર્તકત્વોપપત્તેઃ, કેવલસૂર્યકિરણસ્યાદગ્ધૃત્વેન
તૃણાદિભાસકત્વેઽપિ સૂર્યકાન્તસંયુક્તસ્ય
તસ્ય દગ્ધૃત્વદર્શનાદિતિ ભાવઃ । કિમિતિ તર્હિ
વાક્યજન્યાખણ્ડાકારવૃત્તૌ સત્યામપિ સર્વેષામાત્માજ્ઞાનં ન
નિવર્તત ઇત્યાશઙ્ક્યાહ – વિચારાભાવજીવન ઇતિ । વિચારાભાવ એવ
શ્રવણમનનરૂપયોર્વેદાન્તપ્રમાણતત્પ્રમેયબ્રહ્મવિપયયોર્વિચારયોરભાવ
એવ । જીવનમવસ્થિતિહેતુર્યસ્યાપ્રકાશસ્ય સઃ, વિચારાભાવજીવન
ઇત્યર્થઃ । વાક્યજન્યાપ્યખણ્ડાકારવૃત્તિરસમ્ભાવનાદિભિઃ પ્રતિબદ્ધા
સતી નાજ્ઞાનં નિવર્તયતિ, યથા મણિમન્ત્રાદિભિઃ પ્રતિબદ્ધોઽગ્નિઃ
સંયુક્તમપિ તૃણાદિકં ન દહતિ, તદ્વત્ । તદુક્તં સર્જ્ઞાત્મમુનિભિઃ
–

"પુરુષાપરાધમલિના ધિષણા નિરવદ્યચક્ષુરુદયાપિ યથા ।
ન ફલાય ભૃષ્ટવિષયા ભવતિ શ્રુતિસમ્ભવાપિ તુ તથાત્મનિ
ધીઃ" ॥ ઇતિ। var પાઠભ્ભેદ ભર્ચ્છુવિષયા

યદા તુ સમ્યગ્વિચારેણાસમ્ભાવનાદયો નિવર્તન્તે,
તદા અપ્રતિબદ્ધા સત્યજ્ઞાનં નિવર્તયતિ, યથા
મણ્યાદિપ્રતિબન્ધનિવૃત્તાવગ્નિસ્તૃણાદિકં દહતિ તદ્વત્ । એતદપિ
તૈરેવોક્તમ્ –

"પુરુષાપરાધવિગમે તુ પુનઃ પ્રતિબન્ધકવ્યુદસનાત્ સફલા ।
મણિમન્ત્રયોરપગમે તુ યથા સતિ પાવકાદ્ભવતિ ધૂમલતા ॥ ઇતિ ।

તથા ચાજ્ઞાનસ્યાનિર્વચનીયસ્ય કલ્પિતત્વેન જ્ઞાનાન્નિવૃત્ત્યુપપત્તિઃ ।
ન ચ તસ્ય કલ્પકાભાવોઽજ્ઞાનસ્ય, લોકે દીપવત્, ભાટ્ટપક્ષે
સ્ફુરણવત્, ગુરુમતે સંવેદનવત્, ગુરુબૌદ્ધવ્યતિરિક્તમતે
ભેદવચ્ચ, સ્વપરનિર્વાહકત્વાન્નાપ્યનવસ્થા,
અજ્ઞાનાન્તરસ્યાનઙ્ગીકારાત્ । તથા ચાજ્ઞાનસ્ય
જ્ઞાનનિવૃત્તૌ મૂલોચ્છેદેનાહઙ્કારસ્ય નિવૃત્તિસમ્ભવાદાત્મનિ
પ્રતીયમાનસ્યાહઙ્કારોપાધિપ્રયુક્તસ્ય કર્તૃત્વાદિરૂપસંસારસ્યાપિ
નિવૃત્તિર્ભવતીતિ પ્રયગાત્મનો બ્રહ્મત્વજ્ઞાનં સફલમિતિ ભાવઃ ॥ ૧૭॥

નનુ બ્રહ્મવ્યતિરિક્તસ્ય સર્વસ્યાજ્ઞાનકલ્પિતતયા પરમાર્થતોઽસત્ત્વે કર્મકાણ્ડાદ્યપ્રામાણ્યં સ્યાત્, સ હિ સ્વર્ગકામાદેર્યાગાદિકર્તવ્યતાં બોધયતિ, તચ્ચ નિયોગસ્યાપૂર્વસ્ય નિયોજ્યસ્ય પુરુષસ્ય નિયોગવિષયસ્ય યાગસ્ય, નિયોગફલસ્ય સ્વર્ગસ્ય ચ પરમાર્થતોઽસત્ત્વેઽનુપપન્નં સ્યાત્, બ્રહ્મવ્યતિરિક્તસ્ય સર્વસ્ય પરમાર્થતોઽસત્ત્વ ઉપનિષદપ્રામાણ્યં ચ સ્યાત્, તત્રાપિ હિ મોક્ષકામસ્ય "આત્મા વા અરે દ્રષ્ટવ્યઃ" ઇત્યાદિના શ્રવણાદિકર્તવ્યતા બોધ્યતે, તસ્યાપ્યપ્રમાણ્યમયુક્તમ્, કર્મકાણ્ડોપનિષદેકદેશયોરપિ બ્રહ્મવાક્યેન સહ સમ્પ્રદાયસ્ય તુલ્યત્વાત્, ઇત્યાશઙ્ક્ય કિં તત્ત્વજ્ઞાનોત્તરકાલે કર્મકાણ્ડાદ્યપ્રામાણ્યમાપાદ્યતે, કિં વા તતઃ પૂર્વકાલે? નાદ્યઃ, તદુત્તરકાલં તદપ્રામાણ્યસ્ય ગાર્હસ્થ્યે બ્રહ્મચારિધર્માવેદકશ્રુતેરિવ સંન્યાસાશ્રમકાલેઽગ્નિહોત્રાદિશ્રુતેરિવ ચેષ્ટત્વાદિત્યભિપ્રેત્ય દ્વિતીયં પ્રત્યાહ –

આત્માજ્ઞાનમહાનિદ્રાજૃમ્ભિતેઽસ્મિન્ જગન્મયે ।
દીર્ઘસ્વપ્ને સ્ફુરન્ત્યેતે સ્વર્ગમોક્ષાદિવિભ્રમાઃ ॥ ૧૮॥

આત્મેતિ । આત્માજ્ઞાનમહાનિદ્રાજૃમ્ભિતે, આત્માજ્ઞાનં પ્રત્યગાત્માશ્રયવિષયમજ્ઞાનં તદેવ મહતી નિદ્રા, અનાદિકાલમારભ્ય પ્રવૃત્તત્વાત્, સ્વરૂપાવરણપૂર્વકવિપરીતહેતુત્વાચ્ચ, તતો જૃમ્ભિત ઉત્પન્ને જગન્મયે જગદ્રૂપેઽસ્મિન્નનુભૂયમાને દીર્ઘસ્વપ્ને તત્ત્વજ્ઞાનપર્યન્તમનુવર્તમાન એતે સ્વર્ગમોક્ષાદિવિભ્રમાઃ સ્વર્ગમોક્ષાવાદી યેષાં વિભ્રમાણાં તે તથા, સ્વર્ગશબ્દસ્તત્કામનિયોજ્યનિયોગતદ્વિષયયાગાદેરપ્યુપલક્ષણમ્, મોક્ષશબ્દશ્ચ તત્સાધનજ્ઞાનશ્રવણાદિનિયોગાદેરપ્યુપલક્ષણમ્, આદિશબ્દો લૌકિકવ્યવહારાનુકૂલપુત્રમિત્રાદિસઙ્ગ્રહાર્થઃ, મોક્ષસ્ય બન્ધસાપેક્ષત્વાદ્બન્ધસ્ય ચ મિથ્યાત્વાદ્બન્ધસાપેક્ષમોક્ષસ્યાપિ વિભ્રમત્વં દ્રષ્ટવ્યમ્ । સ્ફુરન્તિ, સ્ફુરન્ત્યેવ નનુ સ્ફુરન્તીત્યર્થઃ । અયં ભાવઃ ।-।- તત્ત્વજ્ઞાનાત્ પૂર્વકાલે વ્યાવહારિકસત્યસ્ય સર્વસ્ય જગતો નિયોજ્યનિયોગાદેઃ સત્ત્વેન પ્રબોધાત્ પૂર્વં સ્વપ્નાદાવિવ સર્વવ્યાવહારોપપત્તેર્ન કર્મકાણ્ડાદ્યપ્રામાણ્યમ્, તસ્ય વ્યાવહારિકપ્રામાણ્યસ્ય સત્ત્વાત્, તાવતા ચ તસ્ય ચરિતાર્થત્વેઽતત્પરાણામગતિકાનાં બ્રહ્મવાક્યાનાં

પરમાર્થસત્યવિષયાણાં નાકસ્માદ્બોધો યુક્તઃ । તદર્થસ્ય વ્યવહારાતીતત્વેન વ્યાવહારિકપ્રામાણ્યાનુપપત્તૌ બ્રહ્મવાક્યાનાં તાત્ત્વિકપ્રામાણ્યસ્યાપ્યનઙ્ગીકારે કિઞ્ચિદપિ પ્રામાણ્યં ન સ્યાત્, પ્રકારભેદેનોભયપ્રામાણ્યોપપત્તૌ ચ સર્વાત્મના તદપ્રામાણ્યં ન યુક્તમ્ । તદુક્તં સકલવેદાર્થજ્ઞેન બ્રહ્મણાપિ –

"સત્યાર્થો હિ દ્વિધા પ્રોક્તો મયા હે સ્વર્ગવાસિનઃ ।
એકઃ સ્વભાવતઃ સાક્ષાત્ પરમાર્થઃ સદૈવ તુ ॥

સ શિવઃ સત્યચૈતન્યઃ સુખાનન્ત્ય સ્વલક્ષણઃ ।
અપરઃ કલ્પિતઃ સાક્ષાદ્બ્રહ્મણ્યધ્યસ્તમાયયા ॥

વ્યાવહારિકસત્યાર્થં સાક્ષાત્ સત્યાર્થચિદ્ઘનમ્ ।
ઉભયં વક્તિ વેદસ્તુ માર્ગા નૈવં વદન્તિ હિ" ॥

અતોઽદ્વિતીયબ્રહ્મણ એવ પરમાર્થસત્યત્વેઽપિ વ્યાવહારિકસત્યાર્થત્વેનાર્થવત્ત્વાન્ન કર્મકાણ્ડાદ્યપ્રામાણ્યમિતિ ॥ ૧૮॥

નન્વેવમપિ જીવસ્ય ભોક્તુસ્તદ્ભોગ્યજાતસ્ય ચ બ્રહ્મમાત્રત્વેઽનુભૂયમાનભોક્તૃભોગ્યવિભાગો ન સ્યાત્, સર્વસ્ય બ્રહ્મણ્યધ્યસ્તત્વાવિશેષાત્, ઇત્યાશઙ્ક્ય માયાવશાદેવ વિભાગોઽયમુપપદ્યત ઇત્યાહ –

જડાજડવિભાગોઽયમજડે મયિ કલ્પિતઃ ।
ભિત્તિભાગે સમે ચિત્રચરાચરવિભાગવત્ ॥ ૧૯॥

જડેતિ। જડાજડવિભાગો, જડમિદં ભોગ્યમજડોઽયં ભોક્તેતિ વિભાગઃ । અયં પ્રતીયમાનોઽજડેઽલુપ્તચૈતન્યસ્વભાવે મયિ પ્રત્યગભિન્ને બ્રહ્મણિ કલ્પિતઃ । માયયારોપિત ઇત્યર્થઃ । સ્વપ્રકાશેઽપ્યેકસ્મિન્ બ્રહ્મણ્યુપાધિપ્રાધાન્યાદ્ ભોગ્યજડકલ્પના, ઉપાધેયપ્રાધાન્યાદજડભોક્તૃકલ્પનાપ્યુપપદ્યતે । તદુક્તં વાર્તિકકારૈઃ –

"તમઃપ્રધાનક્ષેત્રાણાં ચિત્પ્રધાનશ્ચિદાત્મનામ્ ।
પરઃ કારણતામેતિ ભાવનાજ્ઞાનકર્મભિઃ" ॥ ઇતિ ।

અજડે બ્રહ્મણિ સદૃશવિસદૃશોભયકલ્પને દૃષ્ટાન્તમાહ – ભિત્તિરિત્યાદિના । ભિત્તિભાગે કુડ્યપ્રદેશે સમે નિર્વિકારે,

અચલ ઇત્યર્થઃ । ચરાચરવિભાગવત્ ચરસ્ય ગજાદેરચરસ્ય પર્વતાદેશ્ચ વિભાગો યથા, તથેત્યર્થઃ ॥ ૧૯॥

નન્વેવમાત્મનો બ્રહ્મત્વં ન સમ્ભવતિ, તસ્ય સંસારસાક્ષિતારૂપવિકલ્પયુક્તત્વાદ્ બ્રહ્મણશ્ચ “અસ્થૂલમનણુ” , “નેતિ નેતિ” , ઇત્યાદિશ્રુત્યા નિર્વિકલ્પકતયા સિદ્ધેરિત્યાશઙ્ક્યાહ –

ચેત્યોપરાગરૂપા મે સાક્ષિતાપિ ન તાત્ત્વિકી ।
ઉપલક્ષણમેવેયં નિસ્તરઙ્ગચિદમ્બુધેઃ ॥ ૨૦॥

ચેત્યેતિ । ચેત્યોપરાગરૂપા, ચેત્યં કર્તૃત્વાદિપ્રપઞ્ચઃ, તેનોપરાગઃ સમ્બન્ધઃ, તદ્રૂપસાક્ષિતાપિ સાક્ષિત્વમપિ મે મમ પ્રત્યગાત્મનો ન તાત્ત્વિકી, ન પરમાર્થભૂતા, ચેત્યસ્યાપરમાર્થત્વેન તત્સમ્બન્ધિસાક્ષિતાયા અપિ પરમાર્થસ્વરૂપત્વાયોગાત્, કિં ત્વિયં સાક્ષિતા નિસ્તરઙ્ગચિદમ્બુધેર્નિસ્તરઙ્ગઃ પરમાર્થતો નિરસ્તસ્તરઙ્ગઃ કર્તૃત્વાદિપ્રપઞ્ચરૂપો યસ્યાઃ સા, ચિદેવામ્બુધિઃ સમુદ્રો નિસ્તરઙ્ગચિદમ્બુધિઃ, તસ્ય મે મમ પ્રત્યગાત્મન ઉપલક્ષણમેવ, તટસ્થા સતી જ્ઞાપિકૈવ, જગત્કારણત્વમિવ બ્રહ્મણઃ, તથા ચાત્મનો વસ્તુતો નિર્વિકલ્પત્વાન્ન બ્રહ્મત્વાનુપપત્તિરિતિ ભાવઃ ॥ ૨૦॥

એવમુક્તેન પ્રકારેણ બ્રહ્મણિ જગત આત્મનિ ચાહઙ્કારાદેઃ કલ્પિતત્વેન વસ્તુતોઽભાવાત્ પદદ્વયલક્ષ્યે બ્રહ્મણિ ન કશ્ચિદપિ વિકાર ઇત્યાહ –

અમૃતાબ્ધેર્ન મે જીર્ણિર્મૃષા ડિણ્ડીરજન્મભિઃ ।
સ્ફટિકાદ્રૌ મે રાગઃ સ્વાપ્રસંધ્યાભ્રવિભ્રમૈઃ ॥ ૨૧॥

અમૃતેતિ । અમૃતો મોક્ષરૂપઃ સ્વયંપ્રકાશાદ્વયાનન્દ એવાબ્ધિઃ, તસ્ય તત્પદલક્ષ્યસ્યેત્યર્થઃ । મે મમ પ્રત્યગભિન્નબ્રહ્મણો મૃષાડિણ્ડીરજન્મભિર્મૃષારૂપા મિથ્યારૂપા વિયદાદય એવ ડિણ્ડીરાઃ ફેનાસ્તેષાં યાનિ જન્માનિ તૈર્જન્મભિઃ, જન્મપદં નાશસ્યાપ્યુપલક્ષણમ્, ન જીર્ણિર્ન હાનિર્વૃદ્ધિર્વા જીર્ણિપદં વૃદ્ધેરપ્યુપલક્ષણમ્ મિથ્યાવસ્તુનોઽધિષ્ઠાનાદૂષકત્વાદિત્યર્થઃ । બ્રહ્મણિ માયયા વિયદાદ્યુત્પત્ત્યા તદધિષ્ઠાનબ્રહ્મણો ન હાનિર્ન વૃદ્ધિ, ઇત્યેતદ્ભારતીતીર્થૈરપિ કૂટસ્થદીપે ભણિતમ્ –

“માયા મેઘો જગન્નીરં વર્ષત્વેષ યથા તથા ।

ચિદાકાશસ્ય નો હાનિર્ન વા લાભ ઇતિ સ્થિતિઃ" ॥ ઇતિ ।

ત્વંપદલક્ષ્યમપિ શુદ્ધમિત્યાહ – સ્ફટિકાદ્રેરિત્યાદિના । સ્ફટિકાદ્રેઃ સ્ફટિકાદ્રિવત્ સ્વચ્છસ્ય મે મમ પ્રત્યગાત્મનસ્ત્વંપદલક્ષ્યસ્ય, સ્વાપ્નસન્ધ્યાભ્રવિભ્રમૈઃ, સ્વાપ્નોઽવિદ્યાકલ્પિતોઽહઙ્કારાદિઃ, સ એવ સન્ધ્યાભ્રં સન્ધ્યાકાલિકમેઘઃ સ્વસન્નિહિતે સ્વચ્છે સ્વધર્માસઞ્જકત્વસામ્યાત્, તત્કૃતૈર્વિભ્રમૈઃ કર્તૃત્વાદિભ્રાન્તિભિઃ, મેઘવિષયે વિભ્રમા અનવસ્થાનાનિ સંસારાઃ, તૈ રાગઃ સમ્બન્ધો મેઘવિષય આરુણ્યમ્, સ્ફટિકપર્વતસ્યારુણ્યવત્, આત્મનશ્ચિદ્રૂપસ્ય પરમાર્થતઃ કર્તૃત્વભોક્તૃત્વરાગદ્વેષાદિસમ્બન્ધો નાસ્તીત્યર્થઃ । અહઙ્કારાદિધર્મૈરાત્મનોઽસમ્બન્ધોઽપિ શ્રીભારતીતીર્થૈરિવાભાણિ ચિત્રદીપે –

"અહઙ્કારગતેચ્છાદ્યૈર્દેહવ્યાધ્યાદિભિસ્તથા ।
વૃક્ષાદિજન્મનાશૈર્વા ચિદ્રૂપાત્મનિ કિં ભવેત્" ॥ ઇતિ ।

અતઃ પદદ્વયલક્ષ્યમપિ ચૈતન્યમતિશુદ્ધમિતિ ભાવ્ઃ ॥ ૨૧॥

નન્વેવમપિ પદદ્વયલક્ષ્યે બ્રહ્મણ્યસ્ત્યેવ વિકારઃ, તસ્ય પરમાર્થતઃ સત્ત્વાશ્રયત્વસ્ય વક્તવ્યત્વાત્, અન્યથા શશવિષાણવદસત્ત્વપ્રસઙ્ગાત્, ઇત્યાશઙ્ક્યાહ –

સ્વરૂપમેવ મે સત્ત્વં ન તુ ધર્મો નભસ્ત્વવત્ ।
મદન્યસ્ય સતોઽભાવાન્ન હિ સા જાતિરિષ્યતે ॥ ૨૨॥

સ્વરૂપમિતિ । મે મમ પદદ્વયલક્ષ્યસ્ય સત્ત્વં સ્વરૂપમેવ, ન તુ મદાશ્રિતો ધર્મઃ । યથા સત્ત્વસ્ય સત્ત્વાન્તરાશ્રયત્વાભાવાન્નાસત્ત્વં તદ્વદિત્યર્થઃ ।

નનુ ઘટે ઘટત્વવત્ સદ્રૂપ આત્મન્યપિ ધર્મરૂપં સત્ત્વં કિં ન સ્યાદિત્યાશઙ્ક્ય ઘટેષ્વનેકેષુ ઘટોઽયં ઘતોઽયમિત્યનુગતવ્યવહારસિદ્ધયે ઘટત્વજાતિરિવ સદ્વ્યક્તિભેદાભાવેનાત્મનિ સત્ત્વરૂપા જાતિર્નાઙ્ગીકાર્યેત્યાહ – મદન્યસ્યેત્યાદિના । મદન્યસ્ય પદદ્વયલક્ષ્યરૂપાત્મભિન્નસ્ય સતઃ સદ્વ્યક્ત્યન્તરસ્યાભાવાત્ સા સત્ત્વરૂપ જાતિર્નેષ્યતે, એકવ્યક્તૌ જાત્યનઙ્ગીકારે દૃષ્ટાન્તમાહ – નભસ્ત્વવદિતિ ।

ઘટાદિષ્વનુગતવ્યવહારાર્થં ઘટત્વવજ્જાતિરઙ્ગીક્રિયતે । અત્ર તુ વિયદાદેઃ સર્વસ્ય મિથ્યાત્વેન સદન્તરસ્યાભાવાન્નાનુગતવ્યવહારાર્થં ઘટત્વવજ્જાતિરૂપં સત્ત્વમઙ્ગીક્રિયતે કિન્તુ સ્વરૂપમેવ નભસ્ત્વવત્ ।

નનુ ઘટઃ સન્ પટઃ સન્ કુડ્યં સદિત્યાદિપ્રતીત્યનુરોધેન ઘટપટાદ્યુપાધિભિન્નેષુ સત્સ્વનુગતવ્યવહારસ્ય સત્ત્વં જાતિરઙ્ગીક્રિયતામ્, ઇતિ ચેત્, ન, ઉપહિતેષુ સર્વેષ્વનુગતબ્રહ્મરૂપસન્માત્રેણૈવ ઘટાદ્યુપાધિભિન્નેષ્વાકાશેષ્વનુગતમહાકાશેનૈવાનુગતવ્યવહારોપપત્તેઃ, તસ્માન્ન સત્ત્વં જાતિઃ । અત એવ નોપાધિરપિ, અનુગતવ્યવહારાયૈવ તસ્યાપિ કલ્પિતત્વાત્, સત્ત્વસ્ય સન્માત્રબ્રહ્મરૂપત્વં વસિષ્ઠેનાપ્યુક્તમ્ –

“વિશેષં સમ્પરિત્યજ્ય સન્માત્રં યદલેપકમ્ ।
એકરૂપં મહારૂપં સત્તાયાસ્તત્ પરં વિદુઃ ॥ ઇતિ ।

તથા ચ સત્ત્વસ્ય સ્વરૂપત્વેન ધર્મત્વાભાવાદત્યન્તં શુદ્ધમેવ પદદ્વયલક્ષ્યમિતિ ભાવઃ ॥ ૨૨॥

નન્વેવમપ્યાત્મનો જ્ઞાનાશ્રયત્વમઙ્ગીકર્તવ્યમ્, અન્યથા ઘટાદિવદનાત્મત્વાપ્રસઙ્ગાત્ । જ્ઞાનાશ્રયસ્યૈવાત્મત્વાદહં જાનામીત્યાત્મનો જ્ઞાનાશ્રયત્વપ્રતીતેશ્ચ, તથા ચ “ન સાક્ષી ચેતા કેવલો નિર્ગુણશ્ચ” ઇત્યાદિશ્રુત્યા નિર્ગુણબ્રહ્મત્વમાત્મન ઇત્યત આહ –

સ્વરૂપમેવ મે જ્ઞાનં ન ગુણઃ સ ગુણો યદિ ।
અનાત્મત્વમસત્ત્વં વા જ્ઞેયાજ્ઞેયત્વયોઃ પતેત્ ॥ ૨૩॥

સ્વરૂપમેવેતિ । મે મમ જ્ઞાનં ચૈતન્યમ્ સ્વરૂપમેવ, ન તુ મદાશ્રિતો ગુણઃ, કુત ઇત્યત આહ, સ ગુણો યદીત્યાદિના, સ ચૈતન્યં, વિધેયાપેક્ષયા પુંલિઙ્ગનિર્દેશઃ, ચૈતન્યં ગુણ ઇતિ વદન્ વાદી પ્રષ્ટવ્યઃ, કિં તેન ચૈતન્યેનાત્મા વિષયીક્રિયતે ન વા, ઉભયથાપિ દૂષણમાહ । અનાત્મત્વમિતિ, જ્ઞેનાજ્ઞેયત્વયોરાત્મનો વેદ્યત્વેઽનાત્મત્વમ્, ઘટાદિવદવેદ્યત્વે ચાસત્ત્વં વા શશવિષાણવદાપતેત્, ભવેદિત્યર્થઃ । યદ્યાત્મનઃ સ્વસમવેતજ્ઞાનાવિષયત્વમુચ્યતે, તદાજ્ઞાયમાનત્વેનાત્મનોઽસત્ત્વં સ્યાત્, ન હિ પ્રમાણતો જ્ઞાયમાનં શશવિષાણમસ્તીતિ કેનચિત્ પ્રતિપદ્યતે, યદ્યેતદ્દોષપરિજિહીર્ષયા તસ્ય જ્ઞાયમાનત્વમુચ્યેત, તદા ઘટાદિવદનાત્મત્વમાત્મનઃ સ્યાત્, જ્ઞાનવિષયસ્યાનાત્મત્વનિયમાત્ ।

નન્વાત્માશ્રિતજ્ઞાનેનાત્માશ્રયત્વેન ભાસતે, ન વિષયત્વેન, યેન ઘટાદિવદનાત્મત્વં સ્યાદિતિ ચેત્, ન, જ્ઞાનવ્યતિરિક્તસ્ય જ્ઞાનાધીનપ્રકાશસ્ય જ્ઞાનવિષયત્વનિયમેનાત્મનોઽપિ જ્ઞાનાધીનપ્રકાશસ્ય વિષયતાયા આવશ્યકત્વેનાનાત્મત્વદોષતાદવસ્થ્યાત્ ।

ન ચ જ્ઞાનાશ્રયત્વમાત્મત્વે પ્રયોજકમ્, લાઘવાત્, જ્ઞાનત્વસ્યૈવ તત્પ્રયોજકત્વાત્ । અહં જાનામીતિ પ્રતીતેશ્ચાહઙ્કારાશ્રયવૃત્તિવિષયત્વાત્ ।

ન ચ જ્ઞાનં નષ્ટં જ્ઞાનમુત્પન્નમિતિ પ્રતીત્યા તસ્ય જન્માદિમત આત્મત્વમનુપપન્નમિતિ વાચ્યમ્, તસ્યાપિ વૃત્તિવિષયત્વાત્ ।

તસ્માદાત્મનો ન જ્ઞાનં ગુણઃ, કિન્તુ સ્વરૂપમેવ, બાદરાયણોઽપિ “જ્ઞોઽત એવ” ઇત્યાત્મનો જ્ઞાનરૂપત્વં સૂત્રયામ્બભૂવ । સૂત્રસ્યાર્થો વિદ્યારણ્યગુરુભિરધિકરણરત્નમાલાયાં દર્શિતઃ –

“અચિદ્રૂપોઽથ ચિદ્રૂપો જીવોઽચિદ્રૂપ ઇષ્યતે ।
ચિદભાવાત્ સુષુપ્ત્યાદૌ જાગ્રચ્ચિન્મનસા કૃતા” ॥

ઇતિ પૂર્વપક્ષે પ્રાપ્તસિદ્ધાન્તમાહ –

“બ્રહ્મત્વાદેવ ચિદ્રૂપશ્ચિત્ સુષુપ્તૌ ન લુપ્યતે ।
દ્વૈતા દૃષ્ટિર્દ્વૈતલોપાન્ન હિ દ્રષ્ટુરિતિ શ્રુતેઃ” ॥ ઇતિ ।

નનુ જ્ઞાનરૂપ આત્મા સ્વાત્માનં જાનાતિ ન વા, જનાતિ ચેદ્યુગપત્ કર્મકર્તૃત્વપ્રસઙ્ગઃ । ન ચેજ્જાનાતિ, તસ્યાસત્ત્વપ્રસઙ્ગઃ, ઇતિ ચેત્, ન, તસ્ય સ્વપ્રકાશત્વેન જ્ઞાનાન્તરમનપેક્ષ્યૈવ ભાસમાનત્વાત્, નાપિ તસ્ય કર્મકર્તૃત્વમ્, સ્વવિષયત્વાનઙ્ગીકારાત્ । તદુક્તં વિદ્યારણ્યગુરુભિઃ પઞ્ચકોશવિવેકે –

“સ્વયમેવાનુભૂતિત્વાદ્વિદ્યતે નાનુભાવ્યતે ।
જ્ઞાતૃજ્ઞાનાન્તરાભાવાદજ્ઞેયો ન ત્વસત્તયા” ॥ ઇતિ ।

યત્ પ્રસાદાદ્ધિ સર્વં જગદ્ભાસતે સ કથં નાસ્તિ, ન પ્રકાશતે વા, આત્મનઃ સર્વાવભાસકત્વં સ્વસ્યાન્યાનપેક્ષયા ભાસમાનત્વં ચાત્મયોગવિંશેઽપ્યુક્તમ્ –

“અજ્ઞાનતત્કાર્યતદીયભેદાનધ્યક્ષયન્તી નિજસત્તયૈવ।

સ્મર્તું ચ વિસ્મર્તુમહો ન શક્યા સુપ્ત્યાદિષુ સ્વપ્રભયાસ્મિ સા ચિત્" ॥ ઇતિ ।

તસ્માદાત્મા જ્ઞાનરૂપો ન જ્ઞાનગુણક ઇતિ સ નિર્ગુણં બ્રહ્મ ભવેદિતિ ભાવઃ ॥ ૨૩॥

એવમાત્મન આનન્દોઽપિ ન ગુણઃ, કિન્તુ સ્વરૂપમેવેતિ સાધયતિ –

અહમેવ સુખં નાન્યદન્યચ્ચેન્નૈવ તત્ સુખમ્ ।
અમદર્થં ન હિ પ્રેયો મદર્થં ન સ્વતઃ પ્રિયમ્ ॥ ૨૪॥

અહમિતિ । અહમાત્મા સુખમેવ સુખસ્વરૂપ એવ, ન તુ સુખગુણકઃ, યદિ સુખમાત્મનોઽન્યદ્ગુણઃ સ્યાત્, તત્ સુખત્વેનાભિમતં નૈવ સુખં સ્યાત્, કુત ઇતિ ચેત્, કિં તદનાત્મભૂતસુખમનાત્મશેષઃ, ઉત તચ્છેષો વા ?

નાદ્ય ઇત્યાહ – અમદર્થમિતિ । અમદર્થં, ચેદિત્યનુષઙ્ગઃ, આત્મશેષો ન ચેત્ તર્હિ ન તત્ પ્રેયઃ, પ્રીતિવિષયો ન ભવેત્, આત્મશેષસર્પાદૌ પ્રીતિવિષયત્વાદર્શનાત્ ।

ન દ્વિતીય ઇત્યાહ – મદર્થમિતિ । અત્રાપિ ચેદિત્યનુષજ્જ્યતે । મદર્થમાત્મશેષશ્ચેત્ સ્વતઃ પ્રિયં ન સ્યાત્, આત્મશેષસ્ય પુત્રભાર્યાદેઃ સ્વતઃ પ્રીતિવિષયત્વાદર્શનાદિત્યર્થઃ । સુખં હિ સર્વેષાં પ્રિયં ભવતિ, તચ્ચ સ્વત એવ પ્રિયમ્, ન પરોપાધિના, અત આત્મૈવ ભવિતુમર્હતિ ।

કથમિતિ ચેત્, શૃણુ, જગતિ સર્વેષાં પદાર્થાનાં ચતુર્ધાવસ્થિતિઃ । આત્મા પ્રોયોઽપ્રિય ઉપેક્ષ્યશ્ચેતિ, સુખં તાવન્ન વ્યાઘ્રાદિવદપ્રિયમ્, તસ્ય સર્વૈઃ પ્રાર્થ્યમાનત્વાત્, અત એવ ન લોષ્ટાદિવદુપેક્ષ્યમ્, નાપિ પ્રિયમાત્રમ્, તચ્છેષે પુત્રભાર્યાદાવપિ તદ્દર્શનાત્, અતઃ પરિશેષાદાત્મૈવ ।

નન્વાત્મશેષત્વેન તસ્ય પ્રીતિવિષયત્વં કિં ન સ્યાત્, ઇતિ ચેત્, તર્હિ વક્તવ્યમ્, આત્મનિ પ્રીતિઃ કિં નિમિત્તેતિ, યેન સુખમપિ તચ્છેષતયા પ્રિયં જાયતે, સુખસાધનત્વાદિતિ ચેત્, તર્હિ સુખસાધનેનાત્મનોપકાર્યઃ કશ્ચિદ્વક્તવ્યઃ, સ્રક્ચન્દનાદિસુખસાધનેનાન્યસ્યૈવોપકાર્યત્વદર્શનાત્, આત્મનિ ચ કર્મકર્તૃવિરોધાત્ । સ ચોપકાર્યોઽન્યો ન દૃશ્યતે, તસ્માન્ન

સુખસાધનતયાત્મા પ્રિયઃ, કિન્તુ સુખસ્વરૂપતયા । તસ્માન્નાત્મશેષતયા સુખસ્યાપિ પ્રિતત્વમ્, કિન્ત્વાત્મતયૈવ ।

નનુ સુખમુત્પન્નં નષ્ટમિતિ પ્રતીયમાનસ્ય કથમાત્મત્વમિતિ ચેત્, ન, તસ્ય તદ્વ્યઞ્જકવૃત્તિવિષયત્વાત્, સર્વમેતદુક્તં બ્રહ્માનન્દે —

"આત્મા શેષ ઉપેક્ષ્યં ચ દ્વેષ્યં ચેતિ ચતુર્ષ્વપિ ।
આત્મા પ્રેયાન્ પ્રિયઃ શેષો દ્વેષ્યોપેક્ષ્યે તદન્યયોઃ ॥

ઇતિ વ્યવસ્થિતો લોકો યાજ્ઞવલ્ક્યમતં ચ તત્ ।
સુખસાધનતોપાધેરન્નપાનાદયઃ પ્રિયાઃ ॥

આત્માનુકૂલ્યાદન્નાદિસમશ્ચેદમુનાત્ર કઃ ।
અનુકૂલયિતવ્યઃ સ્યાન્નૈકસ્મિન્ કર્મકર્તૃતા" ॥ ઇત્યાદિ ।

આત્મનઃ સુખરૂપત્વં સર્વજ્ઞાત્મમુનિભિરપ્યુક્તમ્ –

"સર્વં યદર્થમિહ વસ્તુ યદસ્તિ કિઞ્ચિત્
પારાર્થ્યમુજ્ઝતિ ચ યન્નિજસત્તયૈવ ।
તદ્વર્ણયન્તિ હિ સુખં સુખલક્ષણજ્ઞાસ્તત્
પ્રત્યગાત્મનિ સમં સુખિતાસ્ય તસ્માત્" ॥ ઇતિ ।

બ્રહ્મગીતાસુ ચ —

"પ્રત્યગ્રૂપઃ શિવઃ સાક્ષાત્ પરમાનન્દલક્ષણઃ ।
પરપ્રેમાસ્પદત્વેન પ્રતીતત્વાત્ સુરર્ષભાઃ" ॥

"સર્વસ્યૈવ તુ કામાય ન સર્વં ભવતિ પ્રિયમ્ ।
કિન્ત્વાત્મનસ્તુ કામાય તતઃ પ્રિયતમઃ સ્વયમ્ ॥

અતો દેવાઃ પ્રિયતમો હ્યાત્મા ન સુખલક્ષણઃ" । ઇત્યાદિ ।

તસ્માદ્યુક્ત્યા, વિદ્વદનુભૂત્યા, બ્રહ્મવિદાં વચનૈશ્ચ, આત્મા સુખરૂપ ઇત્યત્ર ન કશ્ચિદ્વિવાદ ઇતિ ભાવઃ ॥ ૨૪॥

નન્વેવમપિ બ્રહ્મણઃ "એકધૈવાનુદ્રષ્ટવ્યમ્" ઇતિ શ્રુત્યુક્તમખણ્ડૈકરસત્વં ન સમ્ભવતિ, ઉક્તપ્રકારેણ તસ્ય સચ્ચિદાનન્દરૂપત્રયાત્મકત્વાત્ । ન ચ સચ્ચિદાનન્દાનાં તેષાં ત્રયાણામપ્યત્યન્તાભેદ ઇતિ વાચ્યમ્, તથાત્વે તદ્વાચકાનાં સચ્ચિદાનન્દશબ્દાનાં ત્રયાણામપિ પર્યાયતયા સહ પ્રયોગાનુપપત્તેઃ ।

ન હિ ઘટકુમ્ભકલશાદિશબ્દાનામેકાર્થવાચકાનાં સહ
પ્રયોગોઽસ્તીત્યાશઙ્ક્ય બ્રહ્મણોઽખણ્ડૈકરસત્વમુપપાદયતિ —

ન હિ નાનાસ્વરૂપં સ્યાદેકં વસ્તુ કદાચન ।
તસ્માદખણ્ડ એવાસ્મિ વિજહજ્જાગતીં ભિદામ્ ॥ ૨૫॥

ન હીત્યાદિના । એકમદ્વિતીયં સચ્ચિદાનન્દાત્મકં વસ્તુ બ્રહ્મ કદાચન
કદાચિદપ્યુપાધિકાલે તદભાવકાલેઽપિ નાનાસ્વરૂપં નાનારસં ન સ્યાત્,
ન ભવેદિત્યર્થઃ । તત્ર હેત્વભિપ્રાયેણ વસ્ત્વિતિ વિશેષણમ્,
યતો વસ્તુ પરમાર્થભૂતમ્, તત ઇત્યર્થઃ । વસ્તુગ્રહણં
જ્ઞાનાનન્દયોરપ્યુપલક્ષણમ્ ।

અયમર્થઃ — બ્રહ્મણિ સત્યજ્ઞાનાનન્દાનાં પરસ્પરભિન્નત્વે
સત્યસ્ય સત્યત્વં જ્ઞાનસ્ય જ્ઞાનત્વમાનન્દસ્યાનન્દત્વં ચ ન
સિધ્યેત્, કથમિતિ ચેત્, સત્ય યદિ જ્ઞાનાદ્ભિન્નં સ્યાત્, જડસ્ય
તસ્ય શુક્તિકારૂપ્યાદેરિવ સત્યત્વં ન સ્યાત્ । એવં યદિ જ્ઞાનમપિ
સત્યાદ્ભિન્નં સ્યાત્, અસત્યસ્ય તસ્ય જ્ઞાનસ્ય જડત્વનિયમેન જ્ઞાનત્વં
ન સ્યાત્ તતઃ સત્યજ્ઞાનયોઃ સત્યત્વજ્ઞાનત્વસિદ્ધયેઽત્યન્તં
પરસ્પરાભેદોઽઙ્ગીકર્તવ્યઃ । તદુક્તં સર્વજ્ઞાત્મમુનિભિઃ –

"સત્યેઽપ્યસ્તિ જ્ઞાનતા જ્ઞાનતાયાં સત્યત્વં ચ સ્પષ્ટમસ્ત્યેવ તદ્વત્ ।
સત્યપ્યેવં નાતિરેકાવકાશઃ પૂર્ણે તત્ત્વે જ્ઞાનસત્યોપપત્તેઃ" ॥ ઇતિ ।

એવં યદિ જ્ઞાનાદાનન્દોઽપિ ભિન્નઃ સ્યાત્, જ્ઞાનભિન્નસ્ય
તસ્ય ઘટાદિવદનાનન્દત્વમેવ સ્યાત્, તથાનન્દાદપિ
યદિ જ્ઞાનં ભિન્નં સ્યાત્, આનન્દભિન્નસ્ય તસ્ય
ઘટાદિવજ્જડત્વેન જ્ઞાનત્વમેવ ન સ્યાત્, તતો જ્ઞાનાનન્દયોરપિ
જ્ઞાનત્વાનન્દત્વસિદ્ધયેઽત્યન્તમભેદોઽઙ્ગીકર્તવ્યઃ । ઇદમપિ
તૈરેવોક્તમ્ —

"આનન્દત્વે જ્ઞાનતા જ્ઞાનતાયામાનન્દત્વં વિદ્યતે નિર્વિશઙ્કમ્ ।
સત્યપ્યેવં નાતિરેકાવકાશઃ પૂર્ણે તત્ત્વે જ્ઞાનસૌખ્યોપપત્તેઃ" ॥ ઇતિ ।

એવં સત્યાદાનન્દોઽપિ યદિ ભિન્નઃ સ્યાત્, અસત્યસ્ય તસ્ય
શુક્તિરૂપ્યાદેરિવાનન્દત્વં ન સ્યાત્, એવં સત્યમપિ યદ્યાનન્દાદ્ભિન્નં
સ્યાત્, અનાનન્દસ્ય તસ્ય શુક્તિરૂપ્યાદેરિવ સત્યત્વં ન સ્યાત્, તતઃ
સત્યાનન્દયોરપ્યત્યન્તમભેદો વક્તવ્યઃ, ઇદમપિ તૈરેવોક્તમ્ —

"આનન્દત્વે સત્યતા સત્યતાયામાનન્દત્વં નિર્વિવાદં પ્રસિદ્ધમ્ ।
સત્યપ્યેવં નાતિરેકાવકાશઃ પૂર્ણે તત્ત્વે સત્યસૌખ્યોપપત્તેઃ ॥ ઇતિ ।

નિત્યમુક્તશુદ્ધત્વાદિષ્વપ્યેવમેવોહ્યમ્ ।

ન ચ તેષામત્યન્તાભેદે તદ્વાચકસત્યાદિ પદાનાં પર્યાયતા વાચ્યા, અર્થાનાં ભેદસ્યાઙ્ગીકારાત્, સત્યપદં મુખ્યામુખ્યસત્યરૂપબ્રહ્માકાશશબલરૂપે સત્યે વ્યુત્પન્નમ્ । જ્ઞાનપદં ચ ચૈતન્યાન્તઃકરણવૃત્તિરૂપમુખ્યામુખ્યજ્ઞાનદ્વયશબલરૂપે જ્ઞાને વ્યુત્પન્નમ્, આનન્દપદં ચ પ્રત્યગ્બુદ્ધિવૃત્તિરૂપમુખ્યામુખ્યાનન્દે વ્યુત્પન્નમ્ । એવં નિત્યશુદ્ધાદીન્યપિ પદાનિ મુખ્યામુખ્યતત્તદ્દ્વયશબલરૂપે તસ્મિંસ્તસ્મિન્ વ્યુત્પન્નાનીતિ દ્રષ્ટવ્યમ્ । એતત્ સર્વં સર્વજ્ઞાત્મમુનિભિરેવોક્તમ્ —

"આકાશાદૌ સત્યતા તાવદેકા પ્રત્યઙ્માત્રે સત્યતા કાચિદન્યા ।
તત્સમ્પર્કાત્ સત્યતા તત્ર ચાન્યા વ્યુત્પન્નોઽયં સત્યશબ્દસ્તુ તત્ર ॥

બુદ્ધેર્વૃત્તૌ જ્ઞાનતા તાવદેકા પ્રત્યગ્ બોધે જ્ઞાનતા કાચિદન્યા ।
તત્સમ્પર્કાજ્જ્ઞાનતા તત્ર ચાન્યા વ્યુત્પન્નોઽયં જ્ઞાનશબ્દસ્તુ તત્ર ॥

બુદ્ધેર્વૃત્તૌ તાવદાનન્દતૈકા પ્રત્યઙ્માત્રે કાચિદાનન્દતાન્યા ।
તત્સમ્પર્કાત્ કાચિદાનન્દતાન્યા વ્યુત્પન્નોઽયં તત્ર ચાનન્દશબ્દઃ ॥ ઇત્યાદિના ।

તતો વાચ્યાર્થભેદસ્યાઙ્ગીકારાન્ન પદાનાં પર્યાયતાપીતિ ભાવઃ ॥

નનુ કથં તર્હિ વાચ્યાર્થભેદે સત્યાદીનામત્યન્તાભેદ ઉક્ત ઇત્યાશઙ્ક્ય વાચ્યાર્થભેદેઽપિ તલ્લક્ષ્યાર્થાનામભેદાદિત્યાહ, તસ્માદિત્યાદિના । યસ્માત્ સત્યાદીનાં પરસ્પરાભેદેન સત્યાદિરૂપત્વમ્, યસ્માચ્ચ ન પર્યાયતા, તસ્માજ્જાગતીં ભિદાં જગદાકાશાદ્યુપાધિઃ, તત્પ્રયુક્તાં ભિદાં ભેદં વિજહતિ, અતોઽહમખણ્ડ એવાસ્મિ, એકરસ એવાસ્મિ, ન તુ નાનારસઃ, સત્યાદિપદૈર્ભાગલક્ષણયા બોધિતસત્યાદ્યાત્મકાખણ્ડૈકરસોઽસ્મીત્યર્થઃ ।

અત "એકધૈવાનુદ્રષ્ટવ્યમ્" ઇતિ શ્રુત્યુક્તમેકરસત્વમુપપન્નમિતિ ભાવઃ ॥ ૨૫॥

ઇદાનીમુક્તપ્રકારેણ જીવસ્ય બ્રહ્મત્વોપપાદકૈસ્તર્કૈરનુગૃહીતં સત્ તત્ત્વમસ્યાદિવાક્યં જીવબ્રહ્મણોરત્યન્તાભેદં ભાગત્યાગલક્ષણયા બોધયદિ, ઇત્યાહ —

પરોક્ષતાપરિચ્છેદશાબલ્યાપોહનિર્મલમ્ ।
તદસીતિ ગિરા લક્ષ્યમહમેકરસં મહઃ ॥ ૨૬॥

પરોક્ષતેતિ । પરોક્ષતાપરિચ્છેદશ્ચ તત્પ્રયોજકં શાબલ્યં ચ તાનિ તથોક્તાનિ, તેષામપોહેન નિર્મલં પરોક્ષતાપરિચ્છેદશાબલ્યાપોહનિર્મલમ્, પરોક્ષતા પરોક્ષત્વમીશ્વરસ્ય, પરિચ્છેદઃ પરિચ્છિન્નત્વં જીવસ્ય, એતદ્દ્વયં ચ જીવેશ્વરોભયગતવિરુદ્ધધર્માણાં સર્વેષામપ્યુપલક્ષણમ્ । શાબલ્યં જીવેશ્વરોભયગતપરોક્ષત્વપરિચ્છિન્નત્વાદિપ્રયોજકમાયાન્તઃકરણરૂપોપાધિનિમિત્તસમસ્ત સમ્બન્ધઃ, તેષામપોહેન ત્યાગેન નિર્મલં શુદ્ધમ્, ઐક્યાવિરોધીત્યર્થઃ । તદસીતિ ગિરા તત્ત્વમસ્યાદિમહાવાક્યેન લક્ષ્યં જહદજહલ્લક્ષણયા બોધ્યમ્, લક્ષ્યસ્વરૂપમેવાહ – એકરસમિતિ । મહઃ સત્યાનન્દચૈતન્યરૂપમહં પ્રત્યગાત્માસ્મીત્યર્થઃ । અત્રાપ્યનુગ્રાહકયુક્તિઃ પૂર્વવદ્દ્રષ્ટવ્યા, યદ્યાત્મા બ્રહ્મભિન્નઃ સ્યાદાત્મનઃ સર્વાન્તરત્વલક્ષણમાત્મત્વં ન સ્યાત્, એવં બ્રહ્માપિ યદ્યાત્મભિન્નં સ્યાન્નિરતિશયમહત્ત્વલક્ષણં બ્રહ્મત્વં બ્રહ્મણો ન સ્યાત્ । ઇદમપિ તૈરેવોક્તમ્ —

“અદ્વૈતેઽર્થે પ્રત્યગર્થોઽસ્તિ તદ્વત્ પ્રત્યક્તત્વે ચાદ્વયસ્યાપિ ભાવઃ ।
યદ્યપ્યેવં નાતિરેકાવકાશઃ પૂર્ણે તત્ત્વે તત્ત્વમર્થોપપત્તેઃ” ॥ ઇતિ ।

વાચ્યાર્થભેદાદેવોભયોસ્તત્ત્વંપદયોરપર્યાયતાપિ । ઇદમપિ તૈરેવોક્તમ્ —

આદેયાંશેનાણુમાત્રેઽપિ ભેદો યદ્યપ્યેવં ભિન્નમાદાય શબ્દૌ ।
વર્તેતે ત્વય્યદ્વયાત્મપ્રકાશે બાહ્યં હાતું જામિતા નાસ્તિ તસ્માત્” ॥ ઇતિ ।

વાક્યાર્થશ્ચ સકલવેદાર્થાભિજ્ઞેન બ્રહ્મણા બ્રહ્મગીતાયાં સ્ફુટો દર્શિતઃ —

“ત્વમહંશબ્દવાચ્યાર્થસ્યૈવ દેહાદિવસ્તુનઃ ।
ન તચ્છબ્દાર્થતાં વક્તિ શ્રુતિસ્તત્ત્વમસીતિ સા ॥

તદર્થૈક્યવિરુદ્ધાંશં ત્યક્ત્વા વાચ્યગતં શ્રુતિઃ ।
અવિરુદ્ધં ચિદાકારં લક્ષયિત્વા બ્રવીતિ હિ ॥

તદર્થે ચ ત્વમર્થૈક્યં વિરુદ્ધાંશં વિનૈવ ચ ।
કારણત્વાદિ વાચ્યસ્થં રક્ષયિત્વા તુ કેવલમ્ ॥

ચિદાકારં પુનસ્તસ્ય ત્વમર્થૈક્યં બ્રવીતિ ચ।
તત્ત્વંશબ્દાર્થભૂતસ્ય ચિન્માત્રસ્ય પરાત્મનઃ ॥

એકત્વં યત્ સ્વતઃ સિદ્ધં સ હિ વાક્યાર્થ આસ્તિકાઃ ॥ ઇતિ ।

તસ્માચ્છ્રુત્યા યુક્ત્યા બહુજ્ઞાનાં વચનાચ્ચ જીવસ્ય સચ્ચિદાનન્દનિત્યશુદ્ધબુદ્ધમુક્તસ્વરૂપતા સિદ્ધેતિ ભાવઃ ॥ ૨૬॥

ઇદાનીમુક્તસ્વરૂપં બ્રહ્માત્મત્વેન સાક્ષાત્કુર્વતઃ પુરુષસ્ય સ્વપ્રકાશાપરિમિતાનન્દબ્રહ્માત્મતાવસ્થાનલક્ષણા વિદેહમુક્તિઃ પ્રારબ્ધકર્મક્ષયપર્યન્તં દેહેન્દ્રિયાદિપ્રતિભાસસહિતા તાદૃગ્ બ્રહ્માત્મનાવસ્થાનલક્ષણા જીવન્મુક્તિશ્ચ ફલમિત્યભિપ્રેત્ય પ્રકરણમુપસંહરતિ —

ઉપશાન્તજગજ્જીવશિષ્યાચાર્યેશ્વરભ્રમમ્ ।
સ્વતઃ સિદ્ધમનાદ્યન્તં પરિપૂર્ણમહં મહઃ ॥ ૨૭॥

ઉપશાન્તેતિ । ઉપશાન્તો જીવન્મુક્ત્યવસ્થાયાં બાધિતો વિદેહમુક્ત્યવસ્થાયાં સર્વાત્મના નિવૃત્તો જગજ્જીવશિષ્યાચાર્યેશ્વરલક્ષણો ભ્રમો યસ્મિંસ્તત્, તાદૃશમ્ । મુક્તિદ્વયસ્ય જ્ઞાનફલત્વં સર્વજ્ઞાત્મમુનિભિરપ્યુક્તમ્ —

“જીવન્મુક્તિસ્તાવદસ્તિ પ્રતીતેર્દ્વૈતચ્છાયા તત્ર ચાસ્તિ પ્રતીતેઃ ।
દ્વૈતચ્છાયારક્ષણાયાસ્તિ લેશસ્તસ્મિન્નર્થે સ્વાનુભૂતિઃ પ્રમાણમ્ ॥

તસ્માજ્જીવન્મુક્તિરૂપેણ વિદ્વાનારબ્ધાનાં કર્મણાં ભોગસિદ્ધ્યૈ ।
સ્થિત્વા ભોગં ધ્વાન્તગન્ધં પ્રસૂતં ભુક્ત્વાત્યન્તં યાતિ કૈવલ્યમન્તે” ॥ ઇતિ॥

સ્વતઃ સિદ્ધં સ્વપ્રકાશમ્, અનાદ્યન્તમ્, આદ્યન્તરહિતમ્, પરિપૂર્ણં સર્વાત્મકમ્, ત્રિવિધપરિચ્છેદશૂન્યમિત્યર્થઃ, મહસ્તેજોઽહમસ્મીત્યર્થઃ ॥ ૨૭॥

“ઇદાનીમુપનિષદર્થસારસઙ્ગ્રહાત્મકે સ્વરચિતે પ્રકરણે વિદુષાં પ્રવૃત્તિં પ્રાર્થયતે —

લક્ષ્મીધરકવેઃ સૂક્તિશરદમ્ભોજસમ્ભૃતઃ ।
અદ્વૈતમકરન્દોઽયં વિદ્વદ્ભૃઙ્ગૈર્નિપીયતામ્ ॥ ૨૮॥

લક્ષ્મીધર ઇતિ ગ્રન્થકર્તુર્નામ, સ ચ અસૌ કવિઃ સર્વજ્ઞઃ ક્રાન્તદર્શી, તસ્ય સૂક્તસ્ય એવ શરદમ્ભોજાનિ, તાનિ, તૈઃ સમ્ભૃતઃ સમ્પન્નોઽયં સર્વૈરનુભૂયમાનોઽદ્વૈતમકરન્દોઽદ્વૈતં બ્રહ્મૈવ મકરન્દો રસઃ ।

“એતમેવ રસં સાક્ષાલ્લબ્ધ્વા દેહી સનાતનમ્ ।
સુખી ભવતિ સર્વત્ર નાઽન્યથા સુરપુઙ્ગવાઃ” ॥

ઇતિ બ્રહ્મગીતાવચનાત્, વિદ્વદ્ભૃઙ્ગૈર્વિદ્વાંસ એવ ભૃઙ્ગા બ્રહ્મરસજ્ઞાસ્તૈર્નિપીયતાં નિતરામજ્ઞાનનિવૃત્તિપર્યન્તમ્ પુનઃ પુનઃ સેવ્યતામ્ ।

“વિચાર્યાપ્યપરોક્ષેણ બ્રહ્માત્માનં ન વેત્તિ ચેત્ ।
અપરોક્ષાવસાનત્વાદ્ભૂયો ભૂયો વિચારયેત્” ॥ ઇતિ
શ્રીભારતીતીર્થવચનાત્ ।

યદ્યપ્યત્ર પ્રતિશ્લોકં બહુ વક્તવ્યમસ્તિ, તથાપિ મન્દબુદ્ધીનામલસાનાં વ્યુત્પાદનાર્થં પ્રવૃત્તેન મયા ગ્રન્થકાઠિન્યગૌરવભયાદુપરતમિતિ ॥ ૨૮॥

અદ્વૈતમકરન્દસ્ય રસાભિવ્યઞ્જિકા કૃતા ।
સ્વયંપ્રકાશયતિના પુરુષોત્તમશાસનાત્ ॥ ૧॥

બ્રહ્માનન્દરસાસ્વાદમિચ્છદ્ભિર્વિબુધોત્તમૈઃ ।
રસાભિવ્યઞ્જિકા હ્યેષા પરિશીલ્યા સદાદરાત્ ॥ ૨॥

તાપત્રયાર્કસન્તપ્તા મોક્ષકામા મુદા સહ ।
રસાભિવ્યઞ્જિકાગઙ્ગામગ્ના ભવત સત્તમાઃ ॥ ૩॥

વ્યાખ્યા પ્રણીતચ્છલમત્ર બુદ્ધેર્મમાપરાધં વિબુધાઃ ક્ષમન્તામ્ ।
અમ્બાર્ધદેહો ભગવાનતઃ સ્યાદ્બાલાપરાધાત્ પિતૃવત્ પ્રસન્નઃ ॥ ૪॥

શ્રીકૈવલ્યાનન્દયોગીન્દ્રપાદપદ્મદ્વન્દ્વે નિઃસ્રવન્મોક્ષસારે ।
શુદ્ધૈર્હંસૈઃ સેવિતે સુપ્રસન્ને મચ્ચેતોઽર્થી ભૃઙ્ગલીલાં વિધત્તામ્ ॥ ૫॥

ચિદમ્ભોધિસમ્મગ્નચિત્તં ગુણાનાં સતામાલયં શુદ્ધસત્ત્વપ્રધાનમ્ ।
નૃણાં બોધયન્તં પરબ્રહ્મ તત્ત્વં શિવાનન્દયોગીન્દ્રમીડે સદાહમ્ ॥ ૬।
સર્વજ્ઞચૂડામણિમીશ્વરાણામીશાનમિન્દીવરકોમલાઙ્ગમ્ ।
કારુણ્યલાવણ્યસુધાસમુદ્રં શ્રીજાનકીજાનિમહં ભજામિ ॥ ૭॥

મન્દસ્મિતાનન્દિતભક્તજાલં સૌન્દર્યસન્તર્પિતવામભાગમ્ ।
સ્વાનન્દસન્તૃપ્તમમન્દહાસં સામ્બં ભજે ચન્દ્રકલાવતંસમ્ ॥ ૮॥

॥ ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યશ્રીકૈવલ્યાનન્દયોગીન્દ્રપાદકમલ
ભૃઙ્ગાયમાણસ્વયંપ્રકાશાખ્યયતિવિરચિતા
રસાભિવ્યઞ્જિકાખ્યાદ્વૈતમકરન્દવ્યાખ્યા સમાપ્તા ॥

ૐ તત્ સત્
અદ્વૈતમકરન્દ

Encoded by Br. Pranipata Chaitanya
Proofread by Sunder Hattangadi

*Advaita Makaranda*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*